MSS No. 267 Subject Philosophy

Name of MSS मदनविनोद निघण्टु

Author मदनपाल

Period ______ Folios 58 + 00a (59)

Script Sanskrit Source Prithi pal singh, Amritsar

Missing Folios ______

267

VADIC

24

267

मदनविनोदनिघण्टु ; मदनपाल कृत
५८ पत्रक ॥ ल० भ० १५ पं० प्र० पृ०

ह० ल०

267

267



00a

॥ॐ श्रीगणेशाय नमः ॐ बीजं श्रुतीनां सदनं मतीनां॥ जीवेजराणां मदहारिकानां॥ आग्नेयमंत्रमव
पावकानां किंचिन्महः रूपामलमाश्रयामि॥१॥ लब्धाः कपोलमधुवारिमधुव्रताली॥ कुंभस्थली
मधुविभूषणलोहितांगी॥ माणिक्यमौलिरिव राजितयस्य मौली॥ विघ्नात्सयत्नपतु विघ्नपसंदा
नः॥२॥ यो ध्वांतसंततिविशालपयोधिमध्ये विष्कामयत्यशरणं भवनं निमज्जत्॥ दत्वाजगत्त्रय
हितः स्वकरावलंबं वाछोस्तवो दिनकरः सपलोकरो नः ३ मिथ्याशनादिकृतदोषवशाद्विकोप॥
नयं वुवर्द्धितउपद्रवनक्रभीमे रोगांबुधौ भवजनस्य निमज्जतोस्य अतः अथकृतप्रभुभानिसर्काशिराजः
४ कौ वत्सेति निर्दिष्टवोतिलक्ष्वः केचिन्महांतोपरं केचिद्गृहीतनामकाः कतिपयाभावस्वभावोजितमाः
तस्मान्नातिलघुर्नवातिविपुलः व्याप्तोधिनामात्मना श्रीयद्द्रव्यगुणान्वितोयमधुनाग्रंथो मया वध्यते
सर्वकायेन संसाध्यं तस्यायुस्थितिकारणं आयुर्वेदोपदेशान्तु कुर्यात्तस्यत्नतो वरः ६ तत्रापि पूर्व
ज्ञातव्याद्रव्यनामगुणागुणाः आतस्तएववक्ष्यंतेनतत्ज्ञाने न क्रिया क्रिमः ७॥ हरीतकीनाम॥
शिवा हरीतकी पथ्या चेतकी विजयाजया प्रमथ्या प्रमथा मोघा कायस्था प्राणदाम्रता जीवनीया हैम
वती पूतना धर्यताभया॥ वयःस्था नंदिनी ज्ञेया श्रेयसी रोहिणी तथा ८ हरीतक्येवरसा लवणाल्लवरोत्क
टा॥ रूक्षोष्णा दीपनी मेध्या स्वादुपाका रसायनी शरावृद्धिप्रदाप्रथ्या वत्सुष्याद्देहृणी लघुः श्वासकास
प्रमोहार्शः कुष्टशोफोदरक्रिमीन वैस्वर्यं ग्रहणीदोषविबंधायानिव मज्वरान् गुल्माध्मानव्रणच्छर्दि

नि॰
१ चं॰

दिक्षार्केड्रवहदामयात्॥ कामलांस्थलमानादं स्त्रीहानंचापकर्षति मधुराम्लतयावातं कषायं स्वादु
मानतः पित्तं हंति कफं हंति कटुत्वेन तत्हरीतकी पथ्यामज्जा तच वृष्या वातपित्तहरा गुरुः मज्जास्थि
तंतमधुरमम्लंस्नायुव्वास्थितंतथा त्वगास्थितंतु कटुकं तिक्तं वृन्तास्थितंमतं पस्थास्थितं कषायं तुरसाना
ङ्कर्मनीषिणाः जीवंतिजीवनीयोग्या त्वावनास्युतनामता सुधावदामृततत्तेनाविजयाविजयप्रदा॥
नृणामभयस्मादभयासाप्रकीर्तिता रोहिणीतुगुणाजोहाश्चेतन्या चेतकीमता॥ अन्वर्थाकथिता।
त्वामातनोलक्षणमुच्यते जीवंतीस्वरीवर्णाभापूतनास्थिमतीमता अग्दतातिदला प्रोक्ताविजया
त्वृवरूपिणी॥ ॥अथआमलेनामगुणाः॥ धात्रीफलामृतफला मलकी श्रीफला शिवं तद्वदात्री
फलंवृष्यं विशेषाद्रक्तपित्तजित्॥ अम्लत्वान्पवनंहंति पित्तं माधुर्यशैत्यतः कफंरूक्षकषायत्वात्
स्मात्किमधिकंफलं मस्थितहरस्तस्यमज्जावृष्योवलप्रदः कषायोमधुरस्तावत्तस्याछर्दिहरा
परं इत्यामलकं॥ अथवहेडानाम॥ विभीतकाकर्षफलोभूतावासःकलिद्रुमः दृर्घाकुशि
कोथमेहेषी कलनिवासकः वसंतोद्योविंध्यजातः संवर्त्तस्तिलपुष्पकः गुणाः विभीतकः स्वादु
पाकः कषायाकफपित्तनुत् उष्णवीर्योहिमस्पर्शोभेदनः कासनाशनः रूक्षोनेत्रहितःकेश्योजंतु
वैस्वर्यनाशकः अक्षमजामदकरी कफमानटकारकः॥ इतिविभीतकनामगुणाः॥ अथच
रडावहेडेआंमलेएकत्रनामगुणाः॥ त्रिफलानंत्रयेणस्याद्वराश्रेष्ठाफलोत्तमा फलत्रिकंफलो

स्त्रेशफलत्रयमुदीरितं ऽभयैकायोजनीयाद्वादेवतुविभतकौ धात्रीफलानिचत्वारित्रिफलैयाप्रकी
र्तिता योज्यास्मित्रो हरीतकाषडेवतुविभीतकाः द्वादशामलकानीतित्रिफलेयमताथवा त्रिफ
लाकुष्टमेहार्शः कफपित्तविनाशनी चक्षुष्यारोपहीरुच्यावयसः स्थापनीसरा इतित्रिफलानामा
नि॥ भूधात्रीवहुपत्रास्याजटाख्यामलकीशिवा गुणा भूधात्रीवातकृत्तिक्ताकषायामधुराहिमा पि
पासाकासपित्तास्रकफपांडुक्षतापहा इतिभूम्यामलकं प्राचीनामलकीप्राचीनागरेऽमलकंमतं त
स्वक्षंपित्तकफघ्नं तु दुर्लंगुरुसमीरजित् इतिप्राचीनामलकीनामानि॥ वासावृषासिंहमुखीभि
षग्माताटरूषका सिंहकलाहिमवनीचैवसिंहास्यावाजिदंतक वासकोवातकृत्स्वादुः कफपित्तास्रना
शनः कासश्वासज्वरछर्दिमेहकुष्टक्षयापहः इतिवासा अथगिलोय गुडूचीकुंडलीछिन्नाव
पःस्यादमृतवल्लरी छिन्नोद्भवाछिन्नरुहा मृताज्वरविनाशिनी वत्सादनीचंद्रहासाजीवंतीचक्रलक्ष
णा गुणा गुडूचीकटुकालघ्वीस्वादुपाकरसायनी संग्राहिणीकषायोष्णावाल्यातिक्ताग्निदीपनी॥
कामलाकुष्टवातास्रज्वरपित्तवमीजयेत् घृतेनचवातंसगुडाविविबंधंपित्तंसिताच मधुनाकफंच॥ वा
तास्रमुग्रंरुवतैलमिश्राशुंठ्यामवातंशमयेद्गुडूची इतिगुडूची विल्वश्चलाटुशैलूषमालूरश्चसदाफ
ला लक्ष्मीफलोगंधगर्भशांडिल्यः कंटकी स्मृतः विल्वग्राहिकषायोस्लोकटुदीपनपाचनम् रुच्यंव
स्वलघुस्निग्धंतिक्तंवातकफापहं वृहंद्गुरुत्रिदोषंस्यादुर्जरंपूतिमारुतम् विदाहिविष्टंभकरंमधुरं

निं: २ धे:

अग्निमं पाटला:

चारः

वह्निमांद्यहृत् ग्राहिणी कफवातामशूलघ्नी बिल्वपेशिका इति बिल्वं अग्निमन्थो जयः केतुरणिर्वै
जयंतिका अन्या जयाजयंती स्यात् तर्कारी गणिकारिका अग्निमंथः श्वयथुहृद्वीर्योष्णः कफवातजि
त् इति अग्निमंथः पाटला कामदूती स्यात् कुंभीका कालवृंतिका स्थाल्यमोघा मदोद्दूती ताम्रपु
ष्पाम्बुवासिनी अन्या फलेरुहा श्वेता कुंभीका काष्ठपाटला पाटलारुचिशोफार्शःश्वासतृट्छर्दिना
शिनी अन्यतुल्या तु वरं स्वादूष्णं कफरक्तहृत् पित्तातिसारदाहघ्नं फलं पित्तास्रहृद्ध्मनहृत् वात
पित्तदयतृष्णारक्तमूत्रविबन्धनुत्॥ इति पाटला॥ काश्मीरी सर्वतोभद्रा श्रीफला कृष्णवृंतिका का
श्मरी काश्मरी हीरा काश्मर्यो भद्रपर्णिका काश्मरी ज्वरशूलघ्नी वीर्योष्णा मधुरा गुरुः तत्पुष्पं वात
लं ग्राहि पित्तास्रकृप्रदतापहृत् फलं रसायनं केश्यं वृंहणीयं गुरुः वातपित्तक्षयतृष्णारक्तमूत्र
विबंधहृत् काश्मरी श्योनाकः पृथुशिंबाः शुकनासाकुटन्नटः भूतवृक्षश्च कट्वंगाः टुंटुकः
शारकोरल कंटकोशमलकोरलुः मयूरजंघो भल्लूकः प्रियजीवकटंवरा श्योनाको दीपनः पाके
कटुस्तुवरको हिमः ग्राहीतिक्तानिलश्लेष्मपित्तकासायनाशना श्योनाकः बिल्वादिभिः पंचभिरेभि
भिरेतैस्तु पंचमूलं महत् हृद्यग्निकारि लघु स्याच्चितिक्तं रसतः कषायं मेदःकफश्वाससमीरहारि इति
काकजंघा॥ महत्पंचमूलं॥ गोक्षुरः त्रिकटः कंटः फलास्वादुः त्रिकंटकः गोकंटको भक्षकंटक
त्रिकंटो व्यालदंष्ट्रकः श्वदंष्ट्रः स्थलशृंगाटः षडंगः चेरिकस्त्रिकः गोक्षुरश्चीतलः स्वादुर्बल

कुद्दालशोधकः प्रमेहश्वासकासास्रकृच्छ्रहृद्रोगवातजित् ॥ इतिभषडानामगुणाः ॥ शालिपर्णी ध्रुवा ।
सौम्या त्रिपर्णी पीवरी स्थिरा विदारीगंधातिगुहा दीर्घमूलांशुमत्यपि शालिपर्णी गुरुश्छर्दिज्वरश्वा
सातिसारजित् शोषदोषत्रयहरा बृंहण्युक्ता रसायनी इतिशालिवा ॥ पृश्निपर्णी क्रोष्टुपुच्छा धावंनी
कलशीगुहा सृगालवृंतादिजिला पृथक्पर्णी चपर्णिका पृश्निपर्णी लघुर्वृष्या मधुरोष्णा विनाश
येत् रक्तातिसारदाहस्तृड्दोषत्रयवमिज्वरान् पृश्निपर्णी बृहती स्थूलभंटाकी दिग्धिका च महो
टिका वार्ताकी महती सिंही कंटकी राष्ट्रिका कुली बृहती ग्राहिणी हृद्या पाचनी कफवातजि
त् उष्णा कुष्ठज्वरश्वासशूलकासाग्निमांद्यजित् भंटकंटारिका कंटकिनी कुंटकरी निदिग्धि
का दुःस्पर्शा धावनी क्षुद्रा व्याघ्री दुःप्रधर्षिणी सिता क्षुद्रा चंद्रहासा लक्ष्मणा क्षेत्रदूतिका गुणाः
कंटकारी सरा तिक्ता कटुका दीपनी लघुः रूक्षोष्णा पाचनी कासश्वासज्वरकफानिलान् निहंति पी
नसं पार्श्वपीडा कृमिहृदामयान् तद्वच्छ्वेता सिता क्षुद्रा विशेषाद्गर्भकारिणी श्वेतकंटा ॥ कंट्यारी २
इति लघुपंचमूलनामः ह्रस्वाख्यं पंचमूलं स्यात्संच भिर्गोक्षुरादिभिः गुणाः बल्यं पित्तानिलहरं
नात्युष्णं स्वादु बृंहणं लघुपंचमूलं एताभ्यां पंचमूलाभ्यां दशमूलमुदाहृतम् दोषत्रयश्वास
कासशिरःपीडापतंत्रकान् तंद्राश्वेदज्वरानाहारुचिपार्श्वरुजो जयेत् दशमूली दहिमलेख्युग
लसी सिद्धिः सर्वजनप्रिया श्रृंहिमगारथांगसान्नं गलंम्बा वणीवस्तः योगपयुग्पानुष्टिदा च

नि:
२ घं:
3

वृद्धिरप्येतदाह्वया॥ गुणाः ऋद्धिर्बल्या त्रिदोषघ्नी शुक्रला मधुरा गुरुः वृद्धिर्गर्भप्रदा शीता वृष्या
कासक्षयापहा स्मृता ऋद्धिवृद्धि: वौहमन नाम्नि॥ काकोली मधुरा वीरा कायस्था क्षीरशुक्लिका॥ ध्वा
क्षोली वायसोली स्यात्स्वादुमांसी पयस्विनी द्वितीया क्षीरकाकोली शुभ्भांगी क्षीरिणी मता गुणाः
काकोलीयुगलं शीतं शुक्रलं मधुरं गुरु जयेत्समीरदाहास्रपित्तशोषज्वरान् मेदामहामेदाना
मः॥ मेदा ज्ञेया शालिपर्णी विशल्या मेदाभवाधरा महामेदा च मृच्छिद्दा त्रिदंता देवतामणिः मेदा
(गुरु) युगं स्वादु वृष्यं स्तन्यकफापहं वृंहणं शीतलं पित्तरक्तक्षयसमीरजित्॥ जीवकर्षभकना
मः जीवको मधुरः शृंगी ह्रस्वांगः कूर्चशीर्षकः ऋषभो धीररुद्राख्यो विषाणी दुर्धरो वृषः गुणाः
जीवकर्षभकौ तुल्यौ शीतौ शुक्रकफप्रदौ हरतः पित्तदाहास्रकार्श्यवातक्षमाप्नुयात् अष्टकव
र्गनाम॥ अष्टवर्गोऽष्टभिर्द्रव्यैरेतैः शीतोऽतिशुक्रलः वृंहणः पित्तदाहास्रशोषघ्नः स्तन्यगर्भक
(जरय) त् जीवंतीनाम॥ जीवंती जीवनी जीवनीया यशस्करी शाकश्रेष्ठा जीवभद्रा मंगल्या जीवव
र्धिनी गुणाः जीवंती शीतला स्वादुः स्निग्धा दोषत्रयापहा रसायनी बलकरा चक्षुष्या ग्राहिणी ल
घुः मधुयष्टीनामः मधुयष्टी क्लीतनकं यष्टीमधु मधूलिका यष्ट्याह्वं मधुकं यष्टीमधुकं जलसं
भवः गुणाः मधुयष्टी गुरुः शीता बल्या तृड्छर्दिपित्तजित् ३र्मिमुहल्लोठी· माषपर्णीना
म माषपर्णी हस्तिकंबोजी हयपुच्छिका मांसमाषा सिंहमषी स्वादुमाषा महासहा॥ ॥अ

यमद्व्यष्टीनामः ॥ मुद्गपर्णी क्षुद्रसहा सूर्यपर्णी कुरंगिणी वनजा रिंगिणी सिंही शिंबी मार्जारगं
धिका गुणाः माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलासहृत् मधुरा ग्राहिणी शोथवातपित्तज्वरा
स्रनुत् तद्वद्वै मुद्गपर्णी त्रिदोषघ्नी हरा लघुः ॥ मुद्गपर्णीनाम ॥ जीवंतिमद्गुपर्णीस्यामाषपु काको
लीजीवकर्षभौ मेदेद्वे इति मधुरो जीवनीयगणो गुरुः शुक्रकृद्बृंहणः शीतः स्तन्यगर्भकफ
प्रदः रक्तपित्ततृषाशोषज्वरदाहक्षयापहः अयं जीवनीयगुणः ॥ ऐरंड रक्तैरंडनाम ॥
ऐरंडो दीर्घपत्रः स्यात्तरुणो वर्धमानकः चित्रश्चंचुर्गुलो व्याघ्रपुच्छो गंधर्वहस्तकः रक्तैरंडो ह
स्तिकर्णो व्याघ्रो नलोरुवुः उत्तानपत्रो रुरुभो वाजवैरीच चंचलः गुणाः ऐरंडयुग्ममधुरमुष्णंगुरुहि
नाशयेत् शूलशोफकटीवस्तिशिरःपीडोदरज्वरान् ब्रध्नश्वासकफानाहकासकुष्ठाममा
रुतान् तन्मूलदलं स्वादु वारं मूलं समीरजित् ॥ काष्टशारिवा कृष्णशारिवानामः शारिवा
शारदा स्फोटा गोपकन्या प्रतानिका गोपा गोपवल्ली लता ह्या काष्टशारिवा ॥ शारिवायुग
लं स्वादु स्निग्धं शुक्रकरं गुरु दोषत्रयास्रगुदरज्वरातीसारनाशनं ॥ यवास धन्वयवासनामः
यासो महत्स्वेवानंतो दीर्घमूलो यवासकः बालपत्रः समुद्रांतो दूरमूलो तिकंटकः धन्वयास
त्वात्मस्तलीयुः स्पर्शा सादुरालभा ॥ दुरालभा वसुकस्वक चुरालधन्वयासकः गुणाः या
सस्वादुरसतिक्तो हिमः पित्तहरो लघुः हंति दाहकफवातीन् हद्वत्यवासकः इति जवास ॥

बाह्य

४
५

मुंडी भिक्षुः परिव्राजी श्रावणी स्यात्तपोधनी श्रावणी श्रीपतिर्मुंडीतिक्ता श्रवणशीर्षिका महा
मुंडी लोभनीया छिन्नग्रंथिनिका स्मृता कटुं च पुष्पी मुंडी वा गुणौ भूमिकदंबकः मुंडी तिक्ता कटुः पाके
वीर्योष्णा मधुरा लघुः मेध्या गंडापचीकृच्छ्र मिपोन्मादिपांडुजित् इति मुंडीपानी अथ अपामार्गः॥
अपामार्गस्तु शिखरी किणिही खरमंजरी अथः शल्यां शिखरिका प्रत्यक्पुष्पी मयूरिकः अपा
मार्गः सरली तीक्ष्णो दीपनः कफवातजित् निहंति दद्रुसिध्मार्शाकंडूशूलोदरापची इति प्रठकं
डा॥ रक्तापामार्गं॥ ॥ अपामार्गो रक्तो वृंतफलीवशिरः कपिपिप्पली अपामार्गगुणो वातवि
ष्टंभी कफनाशनः न्यूनं पूर्वगुणैर्ज्ञेयं तत्फलं कफपित्तनुत् कंपिल्लनामः कंपिलो रेचनो रक्तचू
र्णको व्रणशोधनः लोहितो रक्तशमनो रेची रंजनिको मतः गुणाः कंपिलः कफपित्तास्रक्रिमि
गुल्मोदरव्रणान् हंति रेची कटूष्णश्च तच्छाकं ग्राहि हिमं तल्ले उष्णाकं ग्राहि दीपनलम् कंपिल दंती
नामः॥ ॥दंती चुणप्रिया नागदंती शीघ्रा मकूलका॥ उपचित्रा गिरिकुंभी स्याद्विशल्योदुंबरच्छ
दः आखुकर्णी वृषैरंडा द्रवंती शंभरी मता मूषकाह्वा तत्श्रेणी प्रत्यक्श्रेणी च पर्णजेको दं।
ती द्वयं सरं पाकरसयोः कटु दीपनम् तीक्ष्णोष्णं हंति पित्तास्रकफशोफोदरक्रिमीन्॥ जयपालो
नाम॥ जयपालो दंतिबीजं ख्यातं च तैंतिरीफलं जयपालो गुरुः स्निग्धो रेची पित्तकफापहः॥
शोतनिसोतनामः॥ त्रिवृत्कुंभो हृणप्रोक्ता भांडी कूटरवा हिणी सर्वानुभूतिः त्रिवृता त्रिपुटा

कंबीलाः

निवी=

४

सरला सता ॥ त्रिवृत्तिक्ता सरा रूक्षा लाघ्वी हृल्लासमारुतजित् कटुपाकोज्वरश्लेष्मपित्तशोफोदरापहा ॥
अथ निसोतनाम ॥ त्रिवृत्काला काला मेषी कालपर्णी च चट्टिका सुविणा स्यात्तु मालविका मसू
रविदला मता त्रिवृत्कालाद्वीगुणा तस्माल्लीवृद्विरेचनी मूर्छादाहमदभ्रांतिकंठोत्कर्षणका
रिणी कटुकात्त्रिवृता सोष्णा क्रिमिश्लेष्मोदरापहा शोफपांडुमहाज्ञीरदहेति श्लेष्मविरेचनी ॥
इंद्रवारुणीनाम ॥ इंद्रवारुणपेद्राक्षा वृषभाक्षी गवादिनी ऐंद्री नाकः क्षुद्रफला विशालेंद्री विशा
दनी ॥ अन्येंद्रवारुणी चित्रफला चित्रा महाफला आत्मरक्ता नागदंती त्रपुसी गजचिर्भटी श्वेत
पुष्पा मरगाक्षी वृत्तैष्यापदत्स्वरा मता महेंद्रवारुणिकुंभा चित्रादेवी च कीर्तिता ऐंद्रवारुद्वयं ति
क्तं कटुपाके सरं लघु वीर्योष्णकामलापित्तकफश्लीहोदरापहम् ॥ इति त्रवृत्ता ॥ अथ आरग्वधना
म ॥ आरग्वधो राजवृक्षः शंपाकः कृतमालकः व्याधिघातः कर्णिकारः प्रग्रहश्चतुरंगुलः
आरोग्यशिंबी स्वर्णागः कर्णादीर्घफलो मतः कुंडली हेमपुष्पा च कालिष्या तोन्तपद्रुमः स्वर्णशे
फालिका पाव कुष्ठसूदननामतः स्वर्णा स्याल्लाल्पपित्तला च सुवर्णद्रुम ईरितः आरग्वधो गुरु
स्वादु शीतलो मस्तरेचनः ज्वरहृद्रोगपित्तास्रवातोदावर्तशूलजित् तत्पुष्पं वा तलग्राहि ति
क्तं पित्तकफापहम् तत्मज्जा मधुरा पाके स्वादि मतं समीरणजित् इति अरग्वधः ॥ अथ नीलिनी ॥
नीलिनी नीलिका ग्राम्या श्रीफला भारवाहिनी रंजिनी कलिका मेला तूतीकम्छा विशोधनी ॥

नीलनीरेचिनीतिक्ताकेश्यामोहभ्रमापहा ॥ उष्णाहंत्युदरप्लीहवातरक्तकफानिलान् ॥ वसमा ॥ कटंकी
कटुकरोहिणीतिक्ताचक्रांगीकटुरोहिणी मत्स्यपित्ताकंडरुहाकृस्नभेदाद्विजाणिका ॥ अशो
करोहिणीमत्स्यशकलाशकुलादनी कटुकेकटुकापाकेतिक्तारूक्षासरालघुः हिमाहंतिकृ
मिश्वासदाहपित्तकफज्वरान् ॥ कंठगोर ॥ अंकोटकस्तामफलः पतिसारोतिकोचकः गु
मत्तेहोविरेचीसाह्नुतिशोदीर्घकीलकः अंकोलकःकटुस्निग्धःतीक्ष्णोष्णवरोलघुः रेचन
कृमिशूलामशोफश्लेष्मविषापहः तत्फलेशीतलंस्वादुश्लेष्मलंबृंहणंगुरुः बल्यविरेचनं
वातपित्तदाहक्षयास्रजित् ॥ सोहुंडःनाम ॥ सहुंडोवज्रतउस्नोहुंडीरोवज्रदंडकः स्नुही
समंतदुग्धाभिपत्रीवज्रीमहातरुः शूलामस्थलिकाध्मानगुल्मशोफोदरानिलान् हंतेह
पीविषप्लीहकुष्टोन्मादाश्मपांतान् ॥ निंबो ॥ निंबोनियमनोनीतारिष्टाम्यातारिभद्रकाःस्व
तिक्तःसर्वतोभद्रापिचुमंदःप्रभद्रकः कुष्टाहादेवदत्तश्चरविमत्रियसर्षपकः निंबःशीतोलघु
ग्राहीकटुपाकोग्निवातनुत् व्रणपित्तकफच्छर्दिकुष्टहल्लासमेहनुत् अपक्वंपाचयेत्विव
पक्वंचपरिशोधयेत् तत्फलंभेदनंस्निग्धमलकुष्टहरंलघुः भकर्द्रेका महानिंबनिंबकरः
कर्मकोविषमुष्टिकः महानिंबोहिमोरूक्षस्तिक्तोग्राहीकषायकः कफपित्तकृमिछर्दि
कुष्टहल्लासरक्तजित् ॥ किरातो ॥ किराततिक्तःकैरातोभूनिंबोरामसेनकः किरा

तकोन्योनैपालः नाडीतिक्तोज्वरांतकः कांडतिक्तोर्धतिक्तस्यान्निद्रारिः सन्निपातहा । गुणा कि
राततोवातस्सारकः शीतलस्तिक्तकोलघुः सन्निपातज्वरश्वासकासपित्तास्रदाहनुत ॥ कु
टजनाम ॥ कुटजोमल्लिकापुष्पः कलिंगागिरिमल्लिकावत्सकः कुटजः कोटिवृक्षकः शक्र
भूरुहः कुटजकटुकोरूक्षोदीपनस्तुवरोहिमः अर्शोतिसारपित्तास्रकफतृष्णामकुष्ठनुत ॥
तस्युष्पंवात्सलेर्गीतंतिक्तंपित्तातिसारजित ॥ इंद्रयवः ॥ पुरुहूतश्चप्रोक्तोभद्रयवफलंकु
लिंगाः कोटजोमृतः शक्राहृपुरुहूतश्चप्रोक्तोभद्रयवस्तथा ऐंद्रोयवस्त्रिदोषघ्नसंग्राही शी
तलः कटुः ज्वरातीसाररक्ताशंक्रिमिवीसर्पकुष्ठनुत ॥ मदनफलनाम ॥ मदनश्छर्दनः पिं
डीतकपिंडीतकंफलम ॥ करहाटश्चनगरशल्यकोविषपुष्पः मदनोवमनस्तिक्तोवीर्यो
ष्णोलेखनोलघु ॥ हृत्कुष्ठकफानाहशोफगुल्मव्रणापहः इतिराढ ॥ अथकंकुष्ठना
कंकुष्ठंकंककाकुष्ठरेचनंरंगनायकम ॥ शोधनंपुलकंहृस्वंवरांगंकिंजवालकं गुणाः कंकु
ष्ठरेचनंतिक्तंकटूष्णंवर्णकारकं क्रिमिशोफोदराध्मानगुल्मानाहमानकफापहम ॥ चोकना
म ॥ हेमाह्वाकुनकाक्षीरीहिमदुग्धाहिमावती ॥ हेमाह्वारेचनीतिक्ताभेदन्युत्क्लेशकारिणी ॥
क्रिमिकंडूकफानाहविषकुष्ठविनाशिनी सातलानाम ॥ सातलाविमलासारीसप्तलाव
हुफेनका ॥ चर्मासाह्वाचर्मकासाफेनादीप्ताचनीलिका गुणाः सातलाकटुकापाकेवात

घोहरि

रा३

लाशीतलालघु तिक्ता शोफकफानाहपित्तोदावर्त्तरक्तजित्॥ इतियोद्दर॥ कदमालनाम॥
अश्मन्तो वालुकापत्रो युग्मपत्रोम्लपत्रकः अम्लहाश्मगशपपोनिः स्यात्कुशालीपापनाशनः
अश्मंतस्तुवरो ग्राही शीतोश्मकफवातजित् निहंतिगलगंडास्त्रगंडमालागलामयान् नमूले
लेषनं ग्राहि गुरु श्लेष्मानिलापहा॥ कांचनारनामः॥ कांचनारः कांचनकः पाकारी रक्तपु
ष्पकः कोविदारोस्य भेदस्या कुदालः कुंडलीकलीः अस्फोतो दालकः स्वल्पकेसरश्चमरीम
तः कांचनारो हिमो ग्राही तुवरः श्लेष्मपित्तनुत् क्रिमिकुष्टगुदभ्रंशगंडमालाव्रणापहः॥
कोविदारोपि तद्वत्स्यात्पुष्पं शीतं तथा लघुः रूक्षं संग्राहि पितास्त्रप्रदररक्तकासनुत्॥ सितालीना
मः॥ निर्गुंडीश्वेतकुसुमः सिंधुकः सिंधुवारकः नीलकेश्याय रोनीलसिंदुकः पुष्पनीलिका
शीतालिका शीतभीरुर्वनको नीलमंजरी निर्गुंडीस्मृतिदा तिक्ता कषाया कटुका लघुः केश्याने
त्रहिताहंति शूलशोथाममारुतान्॥ क्रिमिकुष्ठहविश्लेश्मव्रतं नीलापि ताद्विया॥ अथ मेषशृं
गी मेषवल्लीस्यात् दंष्ट्राजशृंगिका॥ अस्तान्वृदलागावर्ताद्वस्थिकाली विषाणिका॥ मेषशृंगी सरा ति
क्ता वातलाकासनाशिनी॥ रूक्षापाके कटुः पित्तव्रणश्लेष्माक्षिशूलजित्॥ इति मेषशृंगी॥ पुन
र्नवानाम॥ पुनर्नवाश्वेतमूलाघट्टीकोदीर्घपत्रिका॥ विषखेदी दीर्घवर्षाभूः पुनर्भूर्मंडलच्छदः
पुनर्नवासरा तिक्ता रूक्षा शोफानिलव्रणश्लेष्मदराह्नच्या रसायनी॥ इति रक्तसि

टनामानि· पुनर्नवा वरा तिक्ता कटुपाका हिमा लघुः रक्तपुष्पा क्वचिद्दिल्लकः क्रूरकः द्वंद्ववर्षाभू॥
वातलाग्राहिणी श्लेष्मपित्तरक्तविनाशिनी पुनर्नवापरा रक्ता रक्तपुष्पकठिल्लकः इतिरक्तरट
सिटः॥ रास्ना रम्या फलरसा रसा नागंधना कुला॥ सुगंधमूला सिरसा श्रीयसो सुवहा रसा॥ नाम्ना
संपाचनी तिक्ता गुरुः श्लेष्माणिवातजित्॥ शोफश्वाससमीरास्रवातपित्तोदरपहा॥ अथ नाकुली
सर्वंगु यावत्सुगंधया भोगिगंधिका सर्पगंधिरिका प्रोक्ता विद्युद्भीगंधनाकुली नकुलेष्टा मनतासर्पने
त्रावीरितपत्रिका॥ सर्पकंकालिका हेया सुनंदा विषदंष्ट्रिका॥ नकुली तुवरा तिक्ता कटुकोष्णा वि-
नाशयेत् विषलूतावृश्चिकाखुसर्पदोषक्रिमिव्रणान्॥ अथ अश्वगंधानाम· अश्वगंधा याहुरं
गाद्दोगोकर्णाश्वावरोहकः वराहकर्णी वरदा बल्या वाजीकरी वृषा अश्वगंधानिलश्लेष्मशो
फश्वित्रक्षयापहा॥ बल्या रसायनी तिक्ता कषायोष्णाति शुक्रला॥ अथ प्रसारिणी· प्रसारि
णी राजबला चारुपर्णी प्रतानिका सरणी सारणी भद्रपर्णी सुप्रसरा सरा प्रसारिणी गुरुर्वृष्या
संधानबलहृत्सरा वीर्योष्णा वातहृत्तिक्ता वातरक्तकफापहा॥ इतिस्त्रकासवेल॥ अथ शत
तावरी॥ शतावरी द्वेपिशत्रुर्द्वेपिका करकंटिका नारायणी शतपदी शतपाद्द्रुपत्रिका॥
शतावरी गुरुः शीता स्वादुः स्निग्धा रसायनी शुक्रस्तन्यकरा बल्या वातपित्तास्रशोफजित्॥
शतावर्यौ स्वकंठान्या पीवरी धीवरी वरी॥ अभीरुर्बहुपत्रा च महापुरुषदंतिका॥ सहस्रवीर्या

अफतीमू
फारसीनाम

नि·
6
7

केशी सर्जगिनी सूक्ष्मपत्रिका ॥ महासमंगावृत्ती मेध्या हृद्या हृष्यारसायिनी शीतवीर्या निहंतसर्वां
गरदूलीनध्यनामयान् ॥ नदंक्षरुक्विदोषघ्नी ल्यचुरशीलयापहा इति महासमंगावृत्ती ॥ वाला
कुलीरशृंगस्याह्वका कर्कटशृंगका ॥ कंकटाख्या महाघोषा शृंगानाम्नी नतांगरपि शृंगीकषा
यतीतिक्ता स्यादुष्णा निहंति हिक्कावमिज्वरान् तृष्णावमिकफश्वाससदासकासोवुमारुतान् कंटशृं
गी ॥ अथ वमिसयापगणनामानि · पलावापालकः शीतपाषाणापाथ्यरसाह्वपा भ
द्रोदनी समंगा स्यात् समासावरयष्टिका अथ सहदेवगुणनामानि ॥ महावला वीरपुष्पी सह
देवा वृहद्वला ॥ पायाधिनी देवसहा ह्यासा सीतपुष्पिका अथ पिपरीगुणनामानि वलि
वलिवला भारद्वाजी स्याहृद्गंधिनी गांगेरुकीगुणनामानि · गांगेरुकी नागवला विश्वेदेवा
गवेधुका · अथ चतुःस्पर्शनामानि · वालाचतुष्ट्यं शीतं मधुरं वलकांतिकृत् स्निग्धग्राहिसमी
रास्रपित्तास्रक्षतनाशनं श्वासाहृट्वला कुष्ठं हंति वातानुलोमनी गुर्वी नागवला वृष्या विशे
षदास्रपित्तजित् वला रसायणी पुंस्त्ववर्द्धिनी वृंहनी तथा तस्याः फलं हिमस्वादु स्तंभनं गुरु हले
खनं विवंधाध्मानजननं रक्तपित्तनिर्हवेत् ॥ अथ मालकंगुणीगुणनामानि ॥ तेजस्विनी क
फलास्का लासा प्रपवातजित् पाचनतुल्या कटतिक्ता हृच्छिवह्निप्रदीपनी तेजवतीगुणाः जोति
ष्मती वह्निः चैव कंकुणी करभी तथा जोतिष्मती कटुतिक्ता सराकफसमीरजित् अस्तुलावा

सिनीतिक्तावह्निबुद्धिस्मृतिप्रदा ॥ अथ देवदारुगुणनामानि ॥ देवदारुसुराह्वास्यादिन्द्रदारु
सुरद्रुमः भद्रकाष्ठं स्नेहवृक्षः किलिमं शक्रदारु च देवदारु कटुस्निग्धं तिक्तोष्णं लघु नाशयेत्
आध्मानज्वरशोथामहिक्काकंडूकफानिलान् ॥ अथ वीलगुणनामानि ॥ सरलो नंदतष्टीटो ।
नमेरुर्द्वीपवृक्षः कः पूतिदारुपीतवृक्षो महादीर्घो वलिद्रुमः सरलः कटुकः पाके रसायामधु
रोलघुउष्णः स्निग्धः समीराद्दिकेरवार्णामयापहा ॥ अथ पुष्करमूलगुणनामानि ॥ पुष्करा
द्वेपत्रपत्रं पौष्करं पौष्करादिकं काश्मीरपुष्करजटामूलवीरसुगंधिकं पुष्करं कटुकं तिक्ता
मुष्णवातकफज्वरान् हंति शोथारुचिश्वासान्विशेषात्पार्श्वशूलजित् ॥ अथ कुष्ठगुणनामानि ॥
कुष्ठं रोगाह्वयं वीप्यं कौवेरं पारिभद्रकं कुष्ठमुष्णं कटु स्वादु तिक्तं शुक्रप्रदं लघुः हंति वातास्रवीस
र्पकासकुष्ठमरुत्कफान् ॥ कर्कटशृंगीनाम ॥ शृंगीकुलीरशृंगीस्यात्कर्कटशृंगिका ॥ कर्कटा
शृंगकीचाषाशृंगनाम्नीनतोप्यपि शृंगीकषायातीक्ष्णोष्णास्याद्धंतिहिक्कावमिज्वरान् तृष्णावमि
कफश्वासतृष्णकासोर्ध्वमारुतान् ॥ रोहिसनाम ॥ रोहिषं कर्तृणं भूतिर्भूतीकं सरलं तृणं ॥
ध्यामाकं पद्यशंपौर ध्यामकं देवगंधकं ॥ गुणाः रोहिषं कटुकं पाके तिक्तोष्णं तुवरं जयेत् कं
ठहृद्रोगपित्तास्रशूलकासकफज्वरान् ॥ कायफलनाम ॥ कट्फले कुमुदा कुंभी भद्राम
द्रवनीशिवा ॥ गुणाः कट्फलं तुवरं तिक्तं कटु वातकफज्वरान् ॥ हंति श्वासप्रमेहार्शःकास

गरनाखस्ती

नि
८
४

कोंडुग्रामायाहवि॥ भार्गीनाम ॥ भार्गीभरगुभवापद्माकासघ्नीगंधपर्वणी॥खरसाकंभक्रमाता
पाञ्जीब्रह्मणयष्टिका॥गुणाः॥भार्गीरूक्षाकटुस्तिक्ताहच्चोष्णापाचनीजयेत् शोथकासक
फश्वासपीनसज्वरमारुतान्॥ पाषाणभेदनाम॥ पाषाणभेदपौषणोश्मरीभेदो
ष्मभेदकः शिलाभेदोहृशाक्मदोनगाभिन्नगभेदन् गुणाः पाषाणभेदोत्तदरः शीतलोवस्ति
शोधनं सरस्तिक्ताः प्रमेहास्रकृत्कृच्छाश्मरीज्जोजयेत्॥ मोस्तेनाम सर्षपाणांनाम॥ मुस्तंवारय
दोमुस्तामेघाख्याकुरुविंदकः वाराहोव्द्यगणोभद्रमुस्तंराजकशीरुकः पिंडमुस्तं विषध्वंसीनाग
धावे= रोत्थःप्रकीर्तितः गुणाः मुस्तंकटुहिमंग्राहितिक्तंदीपनपाचनं कषायंकृमिपित्तास्रकफपित्तज्वरा
पहं धातकीनाम: धातकीकुंजराशीघ्रपुष्पीप्रमदनीमदा॥पार्वतीपातालपुष्पीस्त्रमिद्धाम
ग्रवासिनी गुणाः धातकीकटुकाशीतामदकृत्तुवरालघुः तृष्णातीसारपित्तास्रविषक्रिमिवि
सर्पजित् शामाचीनाम: सर्पिकावालिकांवष्ठासर्वीचत्वबशंभिका त्रिवष्टकीसूचिमुखीक
षायामुकुटंमुखम् गुणाः सार्पिकोस्मारसेपाकेकषायाशीतलालघुः पक्कातीसारपित्तास्रक
फकंठमयापहं विदारीकंदनाम: विदारीकावृषावल्लीवृषकंदविरालिका कंदवल्लीस्वादु
कंदाम्रगालिकापलाशिकः त्र्यसाप्सुल्लाक्षीरसुल्लाक्षीरवल्लीपयस्विनी॥इक्षुवल्लीमहाश्वेता
क्षीरकंदेक्षुगंधिका विदारीमधुरास्निग्धावृंहणीस्तन्यशुक्रदा गुरुःपित्तास्रपवन दाहान्

दंतरसायनी वाराहीकंदनाम॰ वाराहीमाधवीगृष्टिःसौकरीवनमालिका तस्याःकंदकटिक्रो
डुनामसूवरकंदकः गुणाः वाराहीमधुराकंदीकटुतिक्तातिशुक्रला वल्यापित्तकरावातकफ
पलादजडी
मेहक्रिमेजयेत् पाठानाम पाठावष्टहृद्गतिक्ताप्राचीनांवष्टकीरसा चरतिक्तापापचीली
श्रीयसीवृहत्कर्णिका पाठोस्नाकटकातिक्तावातश्लेष्मह्रालघुः हंतिशूलज्वरछर्दिकुष्ठा
तीसारहृद्रुजः दाहकंडुविषश्वासक्रिमिगुल्मगरव्रणान् मंजिष्ठानाम मंजिष्ठाविजयारक्ता
रक्तांगकालमेषका रक्तयष्टीताम्रवल्लीसमंगासममभूषणा मंजुलाविकसाभंडीच्छत्रिकाज्वर
नाशनी गुणाः मंजिष्ठामधुरातिक्ताकषायास्वरवर्णवित् गुरुरुष्णाविषश्लेष्मशोफयोन्यक्षिशू
लजित् रक्तातिसारकुष्ठास्रविसर्पव्रणमेहनुत् तच्छाकदीपनंस्वादुस्निग्धंपित्तानिलापहं॥
मोठ
मूर्वानामानि॥ मूर्वादिवीमधुरसादेवश्रेणीमधुस्रवा स्निग्धपर्णीपृथक्पर्णीमोरटापील्लु
पर्णिका गुणाः मूर्वासरागुरुः स्वादुस्तिक्तापित्तास्रहनेत् त्रिदोषतरस्माद्धृद्रोगकंडु
कुष्ठज्वरापहा मूर्वाहृष्याचमधुराश्लेष्मकृत्पित्तनाशिनी वायुप्रशमनीहृद्याग्राहिणीगुल्मना
शनी॥ हरिद्रानाम॥ हरिद्रारजनीगौरीरजनीवरवर्णिनी पिंडापीतावर्णवतीनिशा
वर्णविलासिनी गुणाः हरिद्राकटुकातिक्तारूक्षोष्णाश्लेष्मपित्तनुत् वर्ण्यास्रदोषमेहास्रशो
फपांडुव्रणापहा दारुहरिद्रानाम दार्वीदारुहरिद्रान्यापीतदारुपचंपचा कटंकटेरी

भा॰नि॰

पीतद्रुस्वर्णवर्णकटंकटिः गुणाः दार्वीतद्वच्छिरोषान्नेत्रकर्णास्यरोगनुत् वापटानाम॥
प्रपुन्नाटोस्वेदगजश्चक्रमर्दः प्रपुन्नटः दद्रुघ्नोमर्दकोमेषकुसमः कुष्ठहृज्वरः गुणाः प्रपु
न्नाटोलघुःस्वादुःरूक्षःपित्तानिलापहः रूक्षोहिमाश्वासकुष्ठदद्रुचर्मक्रिमीञ्जयेत् हन्त्यु
ष्णंतत्फलंकुष्ठकंडूदद्रुविषानिलान् वातरक्तापहंतस्यशाकंकफकरोलघुः वावचीवाकु
चीनाम॰ वाकुचीचंद्रिकासोमवल्लीपूतिवराफला सोमराजीकृष्णफलावगुंजःकालमेषि
का गुणाः वाकुचीमधुरातिक्ताकटुपाकारसायनी विष्टंभिनीहिमाहृद्यासराश्लेष्मास्रपि
त्तनुत् रूक्षाहंतिकफश्वासकुष्ठमेहज्वरक्रिमीन् तत्फलंपित्तकृच्छ्रंतंकुष्ठवातकफापहं
॥भृंगराजोनाम॰ ॥ भृंगराजोभीकरजोमार्कवःकेशरंजनः भृंगारकोभृंगराजोभृंगाह्वः
सर्ववल्लभः गुणाः भृंगराजःकटुस्तिक्तोरूक्षोष्णःकफवातनुत् दंत्योरसायनोबल्यःकु
ष्ठनेत्रशिरोर्तिजित् पर्पटोनाम ॥पर्पटःकवचोरेणुःपित्तहायवकंटकः गुणाः
पर्पटोहंतिपित्तास्रभ्रमतृष्णाकफज्वरान् संग्राहीशीतलस्तिक्तःदाहनुद्वातलोलघुः शा
णपुष्पीनाम शाणपुष्पीमाल्यपुष्पीधावनीमणचंदिका बृहत्पुष्पीस्वर्णघंटाघंटाशाबो
टुपुष्पिका गुणाः शाणपुष्पीकटुस्तिक्ताश्लेष्मघ्नःछर्दिनिवारिणी त्रायमाणानाम ॥
त्रायमाणावह्नत्राणावार्षिकंत्रायमाणिक गुणाः त्रायमाणासरापित्तज्वरश्लेष्मास्रम्

लजित् ॥ जालनाम ॥ महाजालनिकाचर्मरंगास्यात्पीतकीलका आवर्तिकीवितुंकिनीविंभी

डीरक्तपुष्पिका ॥ गुणा ॥ महाजालनिकातिक्तारोचनीकफपित्तजित् हंतिदाहोदरानाढ्यशोफ

कुष्ठकृमिज्वरान् ॥ अतिविषनाम ॥ अतिविषाशुक्लकंदाविषाप्रतिविषापरा श्यामकंदा।

सितापृंगीदुंबरोपविषाणिका विषोल्लापाचनीतिक्ताश्लेष्मपित्तातिसारजित् इतिप्रतीत॥

अथनिर्विषीनाम ॥ श्यामकंदाचापविषासाविज्ञेयाचतुर्विधा रक्ताश्वेतामरशंकुलापीतव

र्णास्तथैवच यथापूर्वंचविज्ञेयाहल्लाश्रेष्टागुणोत्तमः ॥ गुणा ॥ सर्वदोषहराश्चतालेपाच्छपुषु

नाशिनी श्लेष्मजान्विंशतिरोगान्सद्योहन्तान्निर्विषवनात ॥ अथपर्पीनाम ॥ श्यामकंटाकुंकमर्प

ज्यपटवारंहिनिर्विषे निरभीमंतचापर्यायोसंवातारितिक्तक ॥ काचमाचीनाम ॥ काच्चमा

चीध्वंक्षमाचीकामाचीजयनीफला रसायनावरासर्वतिक्तास्यात्काकिनीकटुः ॥ गुणा ॥ काच

माचीत्रिदोषघ्नीस्वदोषास्वरसुक्रदा हृद्यारसायनीशोफकुष्ठार्शोज्वरमेदजित् ॥ काक

जंघानाम ॥ काकजंघानदीकांताकाकतिक्तासुलोमशा पारावतपदीकाकासदन्याकंटिनीतथा ५

गुणा ॥ काकजंघाहिमादंतिरक्तपित्तहिमज्वरान् ॥ रोध्रवल्लानाम ॥ रोध्रस्तिरीटकातील

ल्लिल्वकःसेतरोद्भवः अन्योज्ञनत्वक्सावरकश्वेतरोध्रोत्तमभेषजं ॥ गुणा ॥ रोध्राविरेचकंशीतः

वल्क्याकफपित्तनुत् कषायोरक्तपित्ताश्रम्यरातीसारनाशनः तत्तुबंधमधुरंग्राहिसतिक्तंस्मे।

१० नि॰

10

कफपित्तनुत् विधारानाम वृद्धदारुमहाश्यामाजांगलोजीर्णवल्कलः ऋक्षाकोटरपुष्प्याःस्या
दावेगीछागलांत्र्यपि गुणा वृद्धदारुकषायोष्णः सरस्तिक्तोरसायन वृष्योवातामवातघ्नःशो
फमेहकफाञ्जयेत् ऊर्ध्वरवेल देवदालीनाम देवदालीवृत्तकेशोदेवताडोगरागरी जीमूतोता
रिकावेणीजालिनीखरतुविषापहा गुणा देवदालीरसेतिक्ताकफार्शः शोफपांडुनः नाशयेद्दा
मानीनीक्षयहिक्काक्रिमिज्वरान् हंसपादीनाम ॥ हंसपादीहंसपदीरक्तपादीत्रिपादिका ॥
प्रफुल्लादृनीकीटसारीकीटमातामयुस्रवा गुणा हंसपादीगुरुः शीतादृतिरक्तविषव्रणान् विस
र्पदाहतीसारलूताभूतांग्निरोयनी सोमवल्लीनाम ॥ सोमवल्लीयज्ञनीतासोमक्षीरीद्विजप्रिया ॥ गु
णा सोमवल्लीत्रिदोषघ्नीकटुतिक्तारसायनी सर्पाक्षीनाम ॥ नाकुलीसुमहासर्वगंधिनीगंध
नाकुला नकुलेष्टसनासर्पनेत्राचेरितपत्रिका नाकुलीतुवरातिक्ताकटुकोष्णविनाशनी विष
लूताबृश्चिकाविसर्पदोषक्रिमिव्रणान् वटवनाम वटपत्रीमोहनीसाहृषनोरोचनीमता ॥
वटपत्रीयोनिगंधाकषायोस्माविनाशयेत् मस्तकलेस्तंभनेशीतवातलेकफवातजित् लज्जालुना
म लज्जालुर्मोदिनीस्पर्शकम्पवधीरीगवकारिणी नमस्कारीशमीपत्रासमंगारक्तपादिका गुणा
लज्जालुःशीतलस्तिक्ताकषायाश्लेष्मपित्तनुत् रक्तपित्तमतीसारेयोनिरोगान्विनाशयेत् ॥
मसुलीनाम ॥ मुसलीखलिनीतालपत्रीकांचनपुष्पिका महावृष्यावृष्यकंदाखर्जूरीता

लमूलिका गुणा मुसलीमधुरावृष्यावीर्योष्णावृंहणीगुरुः॥ तिक्तारसायनीहंतिगुदजानानिलं
तथा कपिकच्छुनाम॰ कपिकच्छुस्वयंगुप्ताप्राकर्मिलादुरवग्रहा चंडात्मगुप्तालेंगलीमर्कटीसात्मा
दृष्टदा गुणाः कपिकच्छुःपरंवृष्यामधुरावृंहणीगुरुः तद्वीजंवातशमनंवाजीकरणमुत्तमं॥
पोतजीयानाम॥ पुत्रजीवोगर्भकरोयष्टिपुत्रोर्थसाधुकः गुणाः पुत्रजीवोगुरुर्वृष्योगर्भदःश्ले
ष्मवातजित् वंध्यानाम वंध्याकार्कोटकीदेवीकुमान्नष्टव्रणशोधिनी [illegible]
[illegible]॥ मनोज्ञानागारमनीवंध्यावागीश्वरीतथा गुणाः
वंध्याकार्कोटकीलघ्वीकफनुद्व्रणशोधिनी सर्पदर्पहरातीक्ष्णाविसर्पविषवारिणी विस्नुक्रां
तानाम विस्नुक्रांताकटुर्मेध्याकृमिघ्नीकफाजयेत् शंखपुष्पीनाम शंखपुष्पीशंखना
म्नीकिरीटीकंबुमालिनी कंबुपुष्पीस्मृतिहितामेध्यावनविलासिनी शंखपुष्पीसरामेध्यामनाचे
नोविकारिणी रसायनीकषायोष्णास्मृतिदामेहनाशिनी दूधीनाम दुग्धकामधुपर्णीस्वा
दीरिणीस्वादुपुष्पिका गुणा दुग्धिकोष्णागुरुःरूक्षावातलागर्भकारिणी स्वादुर्विष्टंभनीवृ
ष्याकफकुष्टकृमीजयेत् अथवहुफलीनाम हृस्वपत्रावहुफलीपत्राकारापयस्विनी दे
वौषधीसाभेदाम्लकुष्टवीसर्पपांडुजित् सोथकासत्वयस्वासप्लिहन्नोगंडार्वुदापहा रसायनरसाहि
तासिद्धानांसुप्रकारिणी अर्कवल्लीनाम अर्कपुष्पीक्रूरजन्मा जलकामाभिरंटिका गुणा

री७

अर्कपुष्पीक्रिमीश्लेष्ममेहपित्तविकारजित् भेल्लातनाम वल्लातकोनकोवल्लीवीरवृक्षोग्निवक्त्रकः
स्मारुष्करस्तपनोग्निमुखरवोधनुः गुणाः वल्लातकः कषायोष्णः शुक्रलो मधुरो गु
रुः वातश्लेष्मोदरानाहकुष्ठार्शोग्रहणीगदान् हंतिगुल्मज्वरश्वित्रवह्निमां
द्यक्रिमिव्रणान् चरपोटानाम चरपोटादीर्घपात्राकुंभालीतिक्तकामता चरपोटाहिमाहृद्याभे
दनीकासश्वासजित् दानालहूनाम द्रोणपुष्पीप्रसूनकः पालिंदीकुंभयोनिका फछत्राणि
च्छत्रिक द्रोणाकौंडिल्ये हृद्रसारकः गुणा द्रोणपुष्पीगुरुःस्वादुस्त्वारूक्षावातपित्तकृत् भे
दनीकामलाशोथकफक्रिमीहराकटुः ब्राह्मीमंडूकीनाम ब्राह्मीसरस्वतीसोमासमाह्वाब्रह्मचारि
णी मंडूकपर्णीमंडूकीत्वाष्ट्रीदिव्यमहौषधी कपोतविंकाशुनिकालावण्यासोमवल्लरी गुणाः
ब्राह्मीहिमासरास्वादुः लघ्वीमेध्यारसायनी स्वर्यास्मृतिप्रदाकुष्ठपांडमेहास्रकासजित् विष।
शोफज्वरहरातद्वन्मंडूकपर्णिका सुवर्चलाब्रह्मसुवर्चलानाम सुवर्चलार्ककांतास्यात्सूर्य
भक्तासुवर्चला सूर्यवर्तोरविप्रीतास्याद्ब्रह्मसुवर्चला गुणाः सुवर्चलागुरुःशीतामूत्रला
कफवातजित् श्लेष्माकुष्ठमेहाश्मकृच्छ्रज्वरहरालघुः मत्स्याक्षीनाम मत्स्याक्षीवल्लिकाम
त्स्यगंधिस्यादनीतथा गुणा मत्स्याक्षीग्राहिणीशीताकुष्ठपित्तकफास्रजित् गजपिप्पलिकाना
म तोयपिप्पल्यावुवल्लीपहरः कंचटतथा गुणा जलपिप्पलिकाहृद्याचाक्षुष्याशुक्रलाल

व्याः

कुः संग्राहिणी हिमा तत्त्वारकटा दद्रुव्रणापहा गोजिह्वीनाम गोजिह्वा गोजिका गोभी दार्विका खरप
र्णिनी गुणाः गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत् हृद्या प्रमेहकासास्रव्रणज्वरहरा ल
घुः नागदौननाम नागाह्वा दमनी नागगंधा भुजंगपर्णिनी गुणाः स्यान्नागदमनी व्रणपा लू
ता सर्पविषापहा चिरमंटीनाम ॥ गुंजापि विडिका ताम्रा रक्तिका कृष्णलांतिका श्वेतान्याच त्रिसं
काचूडा दुर्मुखा काकपीलुका गुणाः गुंजा केशा वलकरा हृद्या पित्तकफापहा नेत्रामयहरा वृष्या ह
ति गंडग्रहव्रणान् क्रिमीन्द्रलुप्तकुष्ठानि तद्बीजं तापिशापपते वारवेलानाम वेलंतरो दीर्घपत्रो वीर
द्रुर्वरवारकः वेलंतरोऽश्मनुद्ग्राही कफकृच्छ्रानिलार्तिहृत् वृंदानाम वृंदकास्याद्वृक्षरुहा शेख
रीकामवृंदकः वृक्षादनी कामिनकः कामस्यमरी रोहिणी वृंदाकः कफवातास्ररक्षोव्रणविषाप
हा पिंडारुनाम पिंडारुः करहाटः स्याद्धीलाकीलः कुरंगकः गुणाः पिंडारो मधुरः शीतः
शोषकृत्पित्तकफापहा ॥ छिक्कारीनाम ॥ छिक्किका क्षवकः क्रूरी नासासंवेदनपटः छिक्किका पित्तला
कृत्क्रिमिवातकफापहा रोहितनाम रोहितो दाडिमीपुष्पो रोहितः कूटशाल्मलिः प्लीहारी रोहि
णी रोहा रक्तः चक्षुः पारिजातकः गुणाः रोहीतकः सरोगुल्मदयप्लीहोदरापहः मोचरसनाम ॥
मोचकः स्यान्मोचरसः शाल्मलीवेष्टको मतः मोचनिर्यासकः पिच्छा मोचस्रावो वेष्टकः गुणाः मो
चकः शीतलो ग्राही गुरुर्वृष्योऽतिसारजित् प्रवाहिकास्रपित्तास्रकफदाहनिवर्हणः चोपचीनामः

चवे २

नि॰
१२
12

अर्जगंधा वसुगंधा कवरी पूतिवर्धनः अर्जगंधा लघू रुच्या हृद्या दृक्कफवातनुत् कटुमेलवुनाम॰
सौरीयकः सहचरः सैरीयः किंकिरातकः नीलम्लाबगलाः प्रोक्तो बाणानंदनवाकयपि गुणा सै
रेयः कुष्टवातास्रकफकंडूविषापहः तिक्तोसौ मधुराः केश्यः सुस्निग्धः केशरंजन सितरेयंटानाम॰
सितसंदा श्वेतपुष्पा कटभा गिरिकर्णिका सिता परा नाम्नेना विषघ्नी मेहनाशनी नीलसंदा व्यक्तगंधा
नीलपुष्पा गवादिनी गुणा श्वेतपुष्पा हृद्यं शीतं प्रहृग्ले हृष्टिकें टहून् कंदमूलत्रिदोषामशोफव्रणा
विषापहं ॥मरवरोनालीमावारः ब्रत्तरः तरकः शीतलो वृष्यो गुरुवातकफास्रजित् ॥कर्पास
नाम कर्पासः पटुतूलंकामरतो बादरः पिचुः गुणा कर्पासको लघूपाको मधुरो वातनाश
नः तद्बीजं स्तनदं हृष्यं स्निग्धं कफकृद्गुरुः आरामशीतलानाम आरामशीतलादेवगंधा
कुकुरमदेक गुणा आरामशीतला चेता कफपितास्रजित् कटुः ऊकुरादैनाम कुकुरद्रु
लावतटः स्वल्पः पत्रोमरद्रुमच्छदः गुणा कुकुरद्रुः कटुस्तिक्तो ज्वररक्तकफापहाः वामीना
म॰ ॥ वामीशाखधरावारि ब्राह्मीचहिमलोदिक गुणाः वामी शोथहराकुष्टपित्तश्लेष्मापह
हासरा वलमोटानाम वालामोटा जयास्फृत्या पत्राजेयापराजिता वालान्यावयतेयस्माद्व
लामोटा तदास्मृता गुणा वलामोटा विषश्लेष्मकृच्छ्रनुद्विजयप्रदा शरपुंखनाम॥ः
शरपंखा कालशाकं प्लीहारि कालिकामता गुणा शरपुंखा यकृत्प्लीहद्रुष्टव्रणविषाप

१२

हा॰ तिक्ताकषायाकासाम्रश्वासज्वरापहालघुः मयूरशिखानाम मयूरह्वामरालेयासाहस्वीमयू
केसुटा मयूराह्वाशिखालक्ष्मीपित्तश्लेष्मातिसारजित् लक्ष्मणानाम लक्ष्मणापुत्रदारक्तविंदुप
त्रावनामिकी गुणा लक्ष्मणागर्भदाशीतामधुराहृष्यात्रिदोषनुत् मांसरोहिणीनाम· मांसरो
हिणपतिरुहावृत्ताचर्मकसाकसा गुणा मांसरोहिणीवृष्यासरादोषत्रयापहा दन्तवाक
लानाम अस्थिसंहारकोवज्रवल्लीकोष्टछेदिका वज्रांगीग्रन्थिमामानवज्रप्रोक्तास्तदस्थिशृंख
ला गुणा अस्थिसंहारकः शीतोवृष्योवातहृदस्थियुक् अर्कोनाम अर्कस्सूर्याह्वयः क्षीरी
मदापुष्पोविकारणः मंदारोवसुकोलर्कोराजार्कोदीर्घपुष्पकः गुणा अर्कद्वयंसरंवातकुष्टकं
डुविषव्रणान् निहंतिप्लीहगुल्मार्शोयकृत्श्लेष्मोदरक्रिमीन् करवीरनाम करवीरोश्वहृस्वे
तापुष्पास्पाद्धतकुंभकाः रक्तपुष्पोयमःशंडुलाभद्रःकरवीरकः गुणा करवीरद्वयंनेत्रकोप
कुष्टव्रणापहं लोहूलक्रिमिकंडूघ्नंहितेविषवत्मतं धत्तूरनाम धत्तूरःकितवोधूर्तोदेवनामद
नःशवः उन्मत्तोमातुलस्तरीतरलःकनकाह्वयः गुणा धत्तूरोमदवर्णाग्निःवातिकृज्वरकुष्ट
हा उष्णोगुरुःव्रणश्लेष्मकंडूरक्रिमिविषापहा अथतत्रअस्यप्रकारः धत्तूरस्त्रिविधःप्रोक्ता।
कृष्णःश्वेतस्तथापरः तत्रामलवरोनामपश्चिमार्णवणिरजः त्रयोसमगुणाप्रोक्तमुच्यतेडोष
धाणिवार कलिकारीनाम कुमारीमंडलामातागरहकन्यातिपिच्छिला गुणा कुमारीभे

नि॰
१३
13

भेदनी शीतला यहृद्या श्लेष्मकफज्वरात् निहंति वह्निविस्फोटपित्तरक्तत्वगामयान् भंगानाम भंगा
गंजा मातुलानी मोहिनी विजया जया गुणा भंगा कफहरा तिक्ता ग्राहिणी दीपनी लघुः तीक्ष्णो
ष्णा पित्तला मोहमदकृद्वाग्निवर्धिनी दूर्वानाम कांचनिः शोणफलिनी काकायुः कोकवल
री गुणा कांचनिस्तन्मदामूर्ध्वव्यथादोषत्रयापहा दूर्वा हिमा विसर्पीस्तृट्पित्तकफदाहजि
त् गंडदूर्वानाम गंडदूर्वा मत्स्यगंधा मत्स्याक्षी शकुलादनी गुणा गंडदूर्वामालोद्रुद्राविनाशि
ग्राहिणी लघुः दाहतृष्णाबलासास्रपित्तक्षयहरो हिमः काशनाम काशः सुपत्रः काशेक्षुरि
षीकः श्वेतचामरः गुणा काशः कृच्छ्राश्मदाहास्रपित्तक्षयहरो हिमः मुंजनाम मुंजस्तरः
स्थूलगर्भो ब्रह्मा ह्वोदर्भमेखलः गुणा मुंजो वृष्यो विसर्पास्रमूत्रबल्यक्षरोगजित् नलना
म ॥ नलो रंध्री पुष्पमस्त्सुधमनो रंतकः पिटः गुणा नलो मूत्राति दाहास्रकफपित्तविसर्प
जित् वंशनाम वंशो वेणुः कीचकः सात्कंदरस्त्वभिसारकः गुणा वंशः सरो हिमः पित्तकफ
दाहास्रशोफजित् तत्करीगुरु भेदी श्लेष्मलो वातपित्तजित् भातरभंगानाम जवानी जवनी
तीव्रा तरक्षा मदकारिणी गुणा जवानीजवनी रूक्षा ग्राहिणी मादनी गुरुः खसखासनाम ख
साखसः खसतिलः शुभ्रपुष्पा लसत्फलः गुणा वृष्यो बल्यः खसतिलः श्लेष्मलो वातजिद्गुरुः
वल्कलं तत्फलोद्भूतो रूक्षो ग्राहि विशेषणः अफेनाम अफुकं तद्रसोद्भूतं महिफेनमफेनकं ॥

१३

गुणा आफुकं शोषणं ग्राहि श्लेष्मालं वातपित्तजित् फिलिहिंजानाम हिलदिएपो महामूलः पा
तालगरुडाह्वयः गुणा फलिहिंटः परं वृष्यः श्लेष्मलः पवनापहा घोराज्ञां मखतिलकः क
दारमलनेन श्रीमदनन्त्येन निर्मितेन ग्रंथोभून्मदनविनोदनामधेयो वर्गोयं लिखितपदांकितो ऽभ
यादिः १ इति मदनविनोदे अभयादिवर्गः प्रथमः १ अथ शुंठीवर्गः शुंठीविश्वौ
षधंविश्वं कटभद्रं कटूत्कटं महौषधं शृंगवीरं नागरं विश्वभेषजं गुणा शुंठी रुच्यामवातघ्नी पाच
नी कटुका लघुः स्निग्धोष्णा कटुकापाके कफवातविबंधनुत् वृष्या स्वर्या वमिश्वासकासशूल
हृदामयान् हंति श्लीपदशोथार्शआनाहोदरमारुतान् आर्द्रकनाम आर्द्रकं शृंगवीरं तत्क
टोषधमुदाहृतं गुणाः आर्द्रकं नागरगुणं भेदनं दीपनं गुरुः कटूष्णं दीपनं वृष्यं वह्निदी
पनं वातप्रकोपशमनं पाचनं शोथहृत्परं. भोजनादौ सदा पथ्यं जिह्वाकंठविशोधनं आर्द्र
क रसवीर्यत्वात् तत्परं नकफापहं कांजिकार्द्र सस्यलवणं दीपनपरं मरिचनाम मरिचं व
ल्लिजं तीक्ष्णं मलिनं श्यामं मूषणं गुणा मरिचं कटुकं तीक्ष्णं दीपनं कफवातजित् उष्णं पि
त्तकरं तीक्ष्णं श्वासशूलकृमीन् जयेत् तदार्द्रं मधुरं पाके नात्युष्णं कटुकं गुरुः किंचित्तीक्ष्ण
गुणं श्लेष्मप्रसेकि स्यादपित्तलं पिप्पलीनाम पिप्पली चपला कृष्णा मागधी गणगजा कणा
कृष्णोपकुल्या वैदेही शौंडी स्यात्तीक्ष्णतंडुला गु. पिप्पली दीपनी वृष्या स्वादुपाका रसायनी

ग्रनुष्णा कटुका स्निग्धा कफवातहरा लघुः पित्तला रोचनी हन्ति श्वासकासोदरज्वरान् कुष्ठप्रमे
हगुल्मार्शःप्लीहशूलाममारुतान् आर्द्रा कफप्रदा स्निग्धा शीतला मधुरा गुरुः शुष्का
मूलमोषणानाम कणामूलं कटुग्रंथि पिप्पलीमूलमूषणं षड्ग्रंथि ग्रंथिकं मूलं कटूष्णं पाच
नं लघुः रूक्षं पित्तकरं भेदि कफवातोदरापहं त्र्यूषणं चतुरूषणंनाम विश्वोपकुल्यामरि
चैस्त्र्यूषणं कटुकं कटुः व्योषं कटुत्रयं तत्स्यात् सग्रंथि चतुरूषणं गुणा त्र्यूषणं दीपनं हन्ति श्वास
कासत्वगामयान् गुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसान् चव्यनाम चव्यं च वनमुश्कि
ष्टं चविका कोलवल्लिका पिप्पलीमूलवत्तस्याद्विशेषाद्गुदजापहा गजपिप्पलीनाम तत्फ
लं श्रेयसे हस्तिमारण्या गजपिप्पली गुणा गजकृष्णा कटुः वातश्लेष्मनुद्वह्निवर्धिनी उष्णाय
हन्तातीसारं श्वासकंठामयाक्रिमीन् चित्रकानाम चित्रकोऽनलभुग्व्यालो द्राह्णौ दहनो हनाः
अग्निमाली हविःपाली वह्निनामा विशेषतः गुणा चित्रकः कटुकः पाके वह्निकृत्पाचनो लघुः
रूक्षोष्णो ग्रहणीकुष्ठशोफार्शःक्रिमिकासजित् श्लेष्मानिलहरो ग्राही तत्कूकं श्लेष्मवातनुत्तैः
अथ पंचकोलषडूषणनाम पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः पंचकोलकफानाह
गुल्मशूलपचीजयत् मरिचेनयुतं तत्तु षडूषणमुदाहृतं सोत्रोफहवडीसोफनाम शतपुष्पी
शतावोषा शताह्ना कारवी मिसिः अवाकपुष्पी कविछत्रा शीतका मागधी परा गुणाः शतपु

च्छीलघलीतृष्णापित्तकृद्दीपनी कटु उष्णाज्वरानिलाश्लेष्मव्रणशूलाक्षिरोगजित् स्मृतिकात
गुणाः प्रोक्ता विशेषाद्योनिदोषजित् मेथीनाम मिश्रेयामिसिमालीनो शालीशीतशिवामता गु
णा मिश्रेयादीपनी हृद्या वह्निविट्क्रिमिशुक्रनुत् रुदोल्पानस्कलेका सव मिश्लेष्मामयाञ्जयेत्
वनमेकीनाम मेथिकावाल्लिकाशैलुरहिमयेष्वनमेथिका अद्रिस्योल्पगुणा ल्लस्माङ्ग जिनो मज्ज
पूजितः वलअजमोदानाम अजमोदात्युग्रगंधा मोहादलिमयूरकः खराह्वः कारवी चल्लीवल
मोटस्व मर्कटः गुणा अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत् उष्णा विदाहिनी हृद्या वृ
ष्या वह्निमलालघुः नेत्रामयक्रिमिछर्दिहिध्मावस्तिरुजो नजयेत् जीरे शुक्लजीरकनाम जीर
कं दीर्घकं शुक्लमजाजी गुणा शुक्लकं कृष्णजीरकनाम जीरकं करंगं कृष्णं वर्षाकालेसुगंधिकं॥
कालिका वर्षिका कंचीकारवी चोपकुंजिका कलौंजीनाम पृथ्वीका शावीटयीत्स्थूला जाज्युपका
रिका गुणा जीरकात्रितयं रूक्षं कटूष्णं दीपनं लघुः संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत्
वाह्वज्ञ्यपवमाध्मानगुल्मच्छर्द्यतिसारजित् यवानीनाम यवानी दीप्यको दीप्यो दीपनीयाय
वानिका यवसाह्वोग्रगंधा चगजाह्वाभ्रनटभकः गुणा यवानी पाचनी रुच्या तीक्ष्णोष्णा कटु
कालघुः वातश्लेष्मोदरानाहगुल्मशूलक्रिमीञ्जयेत् कोहरिजवाइरिनाम जवानीयाजवानी
स्याचौहारा जंतुनाशनः चौहारस्तद्गुणाः प्रोक्तो विशेषात्क्रिमिनाशनः चोवहीनाम अजगं

ग

धाप्रतिकेपवर्धिनी पीतवेधरः करवीरखरपुष्पा च तेजोवती मयूरकः गुणाः अपामार्गः कटुस्
तीक्ष्णास्तृषाग्निवर्धिनी हृष्टिमोक्षप्रदा लघ्वी मूत्रकृदाजकफापहा वचोनाम वचोग्रगंधा गो
लोमी षड्ग्रंथा जलिला तथा जटिला शतपर्वा च लोमशा हैमवत्यपि गुणाः वचोष्णकटुकातिक्ता
वामनी सरवह्निकृत् अपस्मारकफोन्मादभूतशूलानिलाञ्जयेत् होहभिरनाम· हपुषा विपुषा
विस्त्रा विंगया विस्रगंधिका अर्धाम्रमस्यफला धान्यनाशिनी मत्स्यगंधिका गुणाः हपुषा दीपनी
तिक्ता कटुष्णा तुवरा गुरुः पित्तोदरसमीराषोग्रग्रहणीगुल्मशूलजित् विडंगनाम विडंगजं
तहनं कृमिघ्नं कमतंडुलः भूतघ्नी तंडुला घोषा केरले मृगगामिनी गुणाः विडंगं कटु तीक्ष्णो
ष्णं रूक्षं वह्निकरं लघुः शूलाध्मानोदरश्लेष्मकृमिवातविबंधनुत् धनीयानाम धान्यकं धान
कं धान्यं धाना धानेयं वितुन्नकं कुस्तुंबुरुमदाढ्रूवियाने धानीयकालका गुणाः धानीयं तुवरं स्नि
ग्धं मधुरं वृष्यं मूत्रलं लघु हृद्यं हृच्यं गंधवित्कं स्वादुपाकं त्रिदोषजित् पाचनं श्वासकासघ्नं तस्मा
मर्शक्रिमीञ्जयेत् अल्लिका तद्गुणा स्वादुर्विशेषात्पित्तनाशिनी हिंगुपत्रीनाम हिंगुपत्री पृथु
त्वी पृथ्वीका चारुपत्रिका वाष्पिका कवरी तंद्री विल्यिका दीर्घिका तथा हिंगुपत्रपराग्रारूपत्री
हिंगुशिवाटिकाजं तकारा मठीनाडीपिंडा हिंगर्फला मता गुणाः हिंगुपत्री हृद्या रुच्या तीक्ष्णोष्णापा
चनेकटुः हृद्बस्तिरुचिविबंधार्शः श्लेष्मगुल्मानिलापहं हिंगुनाम· हिंगुवाह्लीकमसुग्राम

हृंभूतनाशनं॥ अम्लवेतगंधाजरणं जंतुकं स्तुपमुद्रनं गुणाः हिंगु लघु पाचनं रुच्यं तीक्ष्णोष्णं कफवा
तनुत् शूलगुल्मोदरानाहकृमिघ्नं पित्तवर्धनं वंशरोचनानाम· वंशजा वंशवी क्षीरी त्वक्क्षी
री वंशरोचना तुगाक्षीरी तुगा वंशी वंशक्षीरा सुभासिता गुणाः वंशजा बृंहणी वृष्या पीतलाम्ल
धुरुजयेत् तृष्णाकासज्वरश्वासकासपित्तास्रकामलान् सैंधवलवननाम सैंधवं सिंधुजं
सुद्धं मणिमंथं पट्टतमं गुणाः सैंधवं मधुरं स्नेह्यं दीपनं शीतलं लघु चक्षुष्यं पाचनं स्निग्धं वृ
ष्यं दोषत्रयापहं सौवर्चललवननाम सौवर्चलं स्याद्रुचकं हृद्यगंधकं गुणाः सौ
वर्चलं वह्निकरं कटु लेखि विषदं लघु उद्गारशुद्धिदं सूक्ष्मं विबंधानाहशूलजित् विडलवनना
मः विडं कृत्रिमकं पाक्यं द्रुतं च विट्मास्तुरं गुणाः विडं सशूलं विष्टंभि शूलहृज्जीरकारुचीः
हृन्नाहकफोस्तम्भं धोवातानुलोमनं सामुद्रलवणनाम सामुद्रं वारिसंभूतमक्षीरं व
शिरं तथा सामुद्रं दीपनं स्वादु नातिमूत्रं भेदनं कटु श्लेष्मलं वातनुत् तीक्ष्णमरूक्षं नातिपित्तल
औद्भिदलवननामः औद्भिदं भूमिजं भौमं पार्थिवं पृथिवीभवं गुणाः औद्भिदं रक्तं लेखि सलवकृ वाता
नुलोमनं गडुरोमलवणनाम गडारोमं रोमलवणं रोमकं शाकंवरीभवं गुणाः गडारोमं लघु
वातघ्नं सूक्ष्मं भेदि मूत्रलं पांशुलवणनाम क्षारं पांशुभवं रौमं मेषरं पांशवं च गुणाः
क्षारं गुरु कफ त्रिदोष श्लेष्मलं वातनाशनं यवक्षारनाम सर्जीक्षार यवक्षारः सूकपाक्यो यवाग्रज

कोयवग्रणः स्वर्जिकास्वर्जिकाक्षारः सुखवर्चः सुवर्चिका गुणा यवक्षारोग्निकृद्दीपनः श्लेष्म
श्वासज्वरानपान् आमार्शोग्रहणीगुल्मपक्तिप्लीहहृद्रोजयेत् स्वर्जिकाल्पगुणा तस्माद्धि
शेषाद्गुल्मशूलनुत् काचलवणनाम: काचं त्रिकूटं पक्वाद्गलवणं काचसंभवं गुणा
काचं दीपनमत्युष्णं रक्तपित्तविवर्धनं सोहागानाम टंकणो मालतीजातो द्रावी लोहवि
शुद्धिदः गुणा टंकणोग्निकरो रूक्षो कफघ्नो वातपित्तकृत् सुवर्चक्षारनाम: सुयाम्लताद्भ
यः सोथ भवणांकदशार्करा गुणा सुयारोग्निसंकाशः पीकीक्लेदविदारणः साजीक्षारनाम:
पलाशतिलमाषश्वदंष्ट्राकाकशलीरसा अपामार्गार्कसाह्वाण्डसीतलकादिसमुद्भवा गुणा क्षा
रवह्निसमाः सर्वे पाचना भेदिदारणाः लघवः क्लेदिनस्तीक्ष्णाः शुक्रौजाहृच्चिनाशनाः रक्तपित्त
कराश्छिन्नविबंधानाहपीनसान् पक्तिप्लीहबलासामगुल्मार्शोग्रहणीक्रिमीन् इतिमदनविनो
देसुखादिवर्गः द्वितीयः ॥ २॥ अरोगपथ्यापोन्नवबलवीभिर्वलंविनो
दायरिचुंभितास्स उंड्रेष्वपिवंतोपजिवहृदे नमाम्यहं मृगधाहरिमाश्रयामि ॥ कर्पूरनाम: ॥
कर्पूरः स्फटिकश्चंद्रः सिताभ्रो हिमवालुकः हिमोपलः शीतरजो भूतीकस्तु हिनाह्वयः गुणाः ॥
कर्पूरः शीतलो वृष्यो वक्त्रष्यो लेखनो गुरुः कफदाहास्यवैरस्यमेदोशोफविषापहः कस्तूरीद्वय
नाम कस्तूरिका मृगमदो वेदमुख्या स्वगाउजा मृगनाभिरथान्या सा लताकस्तूरिका गुणा कस्तू

रीभुक्रला गुर्वी कटुका कफशीतजित् उष्णा हंति विषच्छर्दिशोफदौर्गंध्यमारुतान् कस्तूरीसरिका
नत्रनेमाशीमातयालक्षणः स्यद्वर्णापि विषश्लेष्मतृष्णापित्तास्रदाहजित् मलेद्रीनाम· कालीयकं पी
तसारपीतं वायुगप्रियं गुणा कालेयकं नतं गुणं विशेषाद्व्यंगनाशनं कृष्णागुरुनाम· कृष्णागुरुस्या
द्गुरुराजाहं विश्वरूपकं जौगजं शीतमलिनं क्रिमिदग्धमनर्थकं गुणा कृष्णागुरुस्तंकर्णम्हिरो
मद्गुसितलेलघः कुंकमनाम कुंकुमवाहवाह्लीकं वाणमग्निशिखवरं काश्मीरं पीनसरक्तं हृतेको
चैपिशुनेयुकं गुणा कुंकुमंकटुकं दिप्या शिरोरुग्व्रणजंतुजित् उष्णदास्यकरं वापि व्यंगदोष
त्रयापहं सिल्हकनाम· सिल्हकः कपिजो तूरुष्कः पिंडिकः कपिः गुणा सिल्हकः कुष्ठ
कंडूघ्नः स्निग्धोला सुक्रकांतिकृत् ऐलवालकनाम· ऐलवालकमेलाकुकालुकं हरिवालुकं॥
ऐलालु शीतलं हंति कंडूकुष्टकफक्रिमीन् तट्टछर्दिविषपित्तास्रहृन्मत्रगदजिल्लघुः जायफ
लनाम· जातीफलं जातिमिस्र शालूकं मालतीसुते गुणा जातीफलं लघुस्वादु हृद्यं दीपनपा
चनं उष्णं कफानिलच्छर्दिक्रिमीपीनसकासजित् जातिपत्रीनाम जातिपत्री जातिपर्णी मालती
पत्रिकानया गुणा जातिपत्री लघुःस्वादुःकफक्रिमिविषापहा लवंगनाम लवंगशिखरं दिव्यं
लवंवदनपुष्पकं श्रीपुष्पं देवकुसुमं भृंगारं वारिसंभवं गुणा लवंगं लघुचक्षुष्यं हृद्यं दीपनपाच
नं प्रूलनाह्कफश्वासछर्दितृष्णातयापहं कंकोलनाम· कंकोलं कटुकं कोलं मारीचं माधवोचि

ते गुणा कंकोलं लघुसंस्त्रहृद्रोगकफवातान्ग्निमांद्यजित् सूक्ष्मैलानाम एलात्रुटिश्च द्राविडी बहुला
त्रिपुटिर्द्विषा कपोतवर्णा सूक्ष्मैला कोरटी द्राविडी पटी गुणा एला सूक्ष्मा कफश्वासकासार्शोमू
त्रकृच्छ्रहृत् स्थूलैलानाम· स्थूलैला त्रिपुटा कन्या भद्रैला त्रिदिवोद्भवः गुणा स्थूलैला रोचनी शि
शिरालघ्वी कफपित्तजित् त्वचानाम त्वचं वरांगं सकलं त्वक् चोचं तडकं वरं लाटपर्णं च नेत्रं गंगोत्र
रुत्वक्तकमस्रमिकं गुणा त्वचं लघूष्णं कटुकं विषदं स्वादु पित्तले हृत्वस्तिरोगवातार्शोपीनसक्रिमि
मुक्रिहृत् इति दालचीनी अथ पत्रजनाम पत्रं दलाह्वं तापसं तमालं रोमशं रोमशं गुणा·
पत्रमुष्णं लघु श्लेष्मह्रल्लासार्शोनिलापहं इति तमाल नागकेसरनाम· नागकेसरकं नागं
चापेयं केसरं गजं गुणा नागकेसरकं रूक्षमुष्णं लघ्वामपाचनं दौर्गन्ध्यकुष्ठवीसर्पकफपित्त
विषापहं त्रिजातकचतुर्जातकनाम एलादित्रिभिरुद्दिष्टं त्रिजातं त्रिः सुगंधकं चतुर्जातं
सनागं तद्द्वयं वातकफापहं तालीसपत्रनाम· तालीसं तालीसं धात्रीपत्रं तत् केसरं श्वपरंप
थिकापत्रं पर्णांपतुलसीच्छदः गुणा तालीसं लघु तीक्ष्णोष्णं श्वासकासकफानिलान्॥
निहंति रुच्यं गुल्मामवह्निमांद्यक्षयापहं सरलानाम· सरलो सदनश्वेडो नमेरुः पीतवृक्षकः
गुणा सरलः कटुकः पाके तिक्तोष्णः स्निग्धो लघुः कफः श्रीवासनाम श्रीवासो वृक्षधूपश्च श्रीपि
वासः कलिद्रुमः गुणा श्रीवासः कफमूर्धाक्षिरोगवातहरः सरः वालकनाम वालकं

१८
17

9

१८॥

वारि ह्रीवेरंपिंगाम्भ्राचमनंकचं उदीच्यंवज्रमंथाहुंवरिष्टांगंधिमूलकं गुण वालकंशीतलंरू
क्षंलघुदीपनपाचनं रक्तपित्तज्वरश्लेष्मदाहतृष्णाव्रणापहं छत्रधानाम मांसीजटाभूतकेशी
क्रव्यादीनलदंशिवा कृष्णाचपूतनोकेशीगंधमांसिपिशोधिका गुण मांसीहिमात्रिदोषास्त्रदा
हवीसर्पकुष्टजित् उशीरनाम उशीरमभयंमीव्यवीरंवीरणमूलिका गुण उशीरंपाचनंशी
तंलेभनंकफपित्तजित् उल्लास्त्रविषवीसर्पदाहकृच्छ्रव्रणापहं रेणुकानाम्नांसंभालू रेणुकाक
पिलाकौंतीपांडुपुत्रीहरेणुका गुण रेणुकापित्तलामेध्यावह्निकृद्गर्भघातिनी प्रियंगुनाम
मालकंगणीदोफुल ।। प्रियंगुः फलिनीश्यामाकांताह्वानंदिनीलता गुण प्रियंगुः शीतला
वातादाहपित्तज्वरास्त्रजित् परिपेलवनाम परिपेलंप्लवंगोपकाहपरिपेलवं गुण परिपे
लंहिमंकंडू कुष्टास्त्रकफपित्तजित् शैलजीनाम शैलेयंस्थविरंवृद्धंशिलापुष्पंशिलोद्भवं ।।
शैलेयंशीतलंरूक्षंकफपित्तहरंलघुः नावजनाम लामज्जकंजलाधारंदीर्घमूलंजलाशयं ।।
इष्टकापथकंशीघ्रममृणालंसनालकं गुण लामज्जकंहिमंकृच्छ्रदाहदोषत्रयास्त्रजित् ।।
कुंदरुनाम कुंदरुमेचकः कुंदः स्वपुरोमीषणोवली कुंदरुःस्वेदपर्वनः श्लेष्मवध्यज्वरापहः
गुग्गुलुः नाम गुग्गुलः कालनिर्यासोमहिषाक्षः कलंकषः जटायुः कौशिकोदुर्गोदेवधूपः शि
वः पुरः गुण गुग्गुलुर्विशदस्तिक्तोवीर्योष्णः समधुरः सरः भग्नसंधानवृद्धयः सूक्ष्मस्वर्योरसायः

नि॰
१८
18

णः दीपनः पिच्छिलोभग्नः कफवातव्रणापची मेदोमेहास्रवानाम क्लेदकृच्छ्रसमाहृतान् पिटिका
ग्रंथ्यशोथकार्शोग्रंथिगंडक्रिमीञ्जयेत् स्तनवो वृंहणो वृष्यः पुराणस्त्वनिलेल्वणः रालनाम रा
ला सर्जरसो यक्षधूपः सर्जोग्नि वल्लकः रालकः सालनिर्यासयो रालाख्या सालनो रसः गुणा॥
राला हिमा गुरुस्तिक्ता कषाया ग्राहिणी जयेत् ग्राहास्रस्वेदवीसर्पज्वरव्रणविपादिकाः स्थौनेयनाम
म स्थौणेयकं बर्हिचूडं शुकं बर्हं शुकच्छदं गुणा स्थौणेयं शीतलं वृष्यं मेध्यं दोषत्रयास्रजित्॥
चौरकनाम चौरकः कितवः षंडुः दुष्पुत्रः शंकितो रिपुः गुणा चौरः स्वादु लघुः शीतः कुष्ठवात
कफास्रजित् मुरानाम मुरा गंधवती दैत्या गंधाढ्या सुरभिः कुटिः गुणा मुरा शीता लघुः कुष्ठ
ग्रहपित्तानिलास्रजित् कचूरनाम कचूरो द्राविडो गंधमूलको दुर्लभः षटी गुणा कचूरो दी
पनो रुच्यः कुष्ठार्शोव्रणकासजित् उष्णो लघुर्जयेच्छ्वासगुल्मवातकफक्रिमीन् षठीनाम षटी
पलाशी षड्ग्रंथा सुव्रता गंधमूलिनी गुणा षटी श्लेष्मज्वरश्वासकासजिद्ग्राहिणी लघुः स्पृक्का
नाम स्पृक्कासृक्का सुरणी देवी निर्माल्या वधूदिला वधूः स्पृक्का स्वादुर्हिमा वृष्या कुष्ठालेलीत्रिदो
षनुत् पर्णिकानाम ग्रंथिपर्णी नीलपुष्पः शुकपुष्पं विवर्णकं गुणा ग्रंथिपर्णी लघुस्ति
क्तोष्णश्चोत्तलः कफवातजित् नलीनाम नलिका नर्तकी शून्या निमिषा पादमनी नटी नलीपि
त्तास्रजिच्छीता चाक्षुष्या कुष्ठकृच्छ्रजित् पद्माकुनाम पद्मकं मलयं मेहपीतरक्तस्रवप्रभुः

१८

गुणा पद्मकंदो दाहविस्फोटकुष्ठश्लेष्मास्रपित्तजित् गर्भसंस्थापनं शीतं तल्लावीसर्पदाहजित् प्रपुंड
रीकनाम प्रपुंडरीकं पौंडर्यं हंसशालं पुष्पस्तुपुष्पकं गुणा पुंडरीकं हृद्यमुज्ज्वलं शीतं चास्वाद्यं श्लेष्मपित्तजि
त् नगरनाम· नगरं वर्हिणी जिह्मवक्रं कुटिलं कुंचितं नतं अपरं पिंडितं गरं वीनं कटुमहोरगं गुणा न
गरं मधुरं स्निग्धं तिक्तोष्णं लघु मूत्रजित् विषापस्मारमूर्छादि रोगदोषत्रयापहं गोरोचननाम
गोरोचना रुचि गौरी रोचना पिंगला मता मंगल्या गोमती मेध्या वंध्या गोपित्तसंभवा रोचना शीत
ला वश्या गर्भस्रावग्रहास्रजित् नखद्वयनाम· नखो हो करजो शल्यः कररुहः शफः खुरः भु
वक्रम
क्तिशंखो व्याघ्रनखं व्याघ्रायुधं नखपदं गुणा नखद्वयं ग्रहश्लेष्मवातास्रज्वरकुष्ठजित् पतंगना
म पतंगं पारसरंगं स्याद्रक्तकाष्ठं कुचंदनं सुरंगकं जगत्याह्वं पट्टरं पत्त्ररंजनं गुणा पतंगम
धुरं शीतं पित्तश्लेष्मव्रणास्रजित् लाक्षाख्योनाम लाक्षा निर्भत्सरो रक्तः द्रुमव्याधिः पलंकषा ॥
क्रिमिजा जतु दीप्या हाजा पकोलरक्तको मतः लाक्षा वर्ण्या हिमा बल्या स्निग्धश्लेष्मास्रपित्तजित् व्रणो
रक्षतवीसर्पक्रिमिकुष्ठग्रहापहा अलक्तको गुणैस्तद्वद्विशेषाद्व्यंगनाशनः पर्पटीनाम पर्पटी र
जनी कृष्णा जतुका जननी जनी गुणा पर्पटी वर्ण्या शीता कफपित्तास्रकोष्ठजित् पद्मिनीनाम प
द्मिनी विशिनी तेया नलिनी सूर्यवल्लभा कुमुद्वती कैरविणी कुमुद्वत् तदुपप्रिया गुणा पद्मिनी शीतला
गुर्वी पित्तश्लेष्मविषास्रजित् रक्ता विष्टंभिनी स्वादु तद्वत् कुमुदिनी मता पद्मचारिणीनाम· पद्मचारि

एषातिवरायष्ट्याह्वावारटीमता गुणा पद्मा हिमा लघुः श्लेष्मकृच्छ्रजित्वनदाहघ्नीकृत् रेचनी विषहा चैव ना
लं तु वक्त्ररंजनी श्वेतकमलनाम कमलं श्वेतमंभोजं सारसं सरसीरुहं सहस्रपत्रं श्रीवासं शतपत्रं कु
शेशयं पंकेरुहं तामरसं राजीवं पुष्करा ह्वयं अब्जमंभोरुहं पद्मं पुंडरीकं च पंकजं नालं सरोजं नलिन
मरविंदं महोत्पल रक्तकमलनाम रक्तोत्पलं कोकनदं हल्लकं रक्तसंध्यकं नीलोत्पलनाम· नीलोत्प
लं कुवलयं भद्रमिन्दीवरं मतं एतदेव सितं किंचित् कुमुदं कैरवं कुमुत् गुणा कमलं शीतलं वर्ण्यमधु
रं कफपित्तजित् तृष्णादाहास्रविस्फोटविषवीसर्पनाशना तस्मादल्पगुणं किंचिदन्यद्रक्तोत्पलादिकं॥
कल्हारनाम कल्हारं हल्लकं पाथोजं सौगंधिकं मतं गुणा कल्हारं ग्राहि विष्टंभिरूक्षं गुरु सुशीतलं॥
केसरनाम किंजल्कं केसरं गौरी मायीनं कांचनाह्वयं गुणा किंजल्कः शीतलो ग्राही रक्तार्शः कफपि
त्तजित् कौलकाकडीनाम पद्मवीजं हगालोऽपद्मकं पद्मकर्कटी गुणा पद्मवीजं हिमं स्वादु गर्भसं
स्थापनं गुरु कफवातहरं बल्यं ग्राहि पित्तास्रदाहजित् विसशालूकनाम मृणालं विसमभोजना
लं च नलिनीरुहं पद्मामिमूलं शालूकं शालूकं करहाटकः मृणालं शीतलं वृष्यं पित्तदाहास्रजिद्गु
रुः संग्राहि मधुरं रूक्षं शालूकमपि तद्गुणं जातीस्वर्णजातीनाम जातीमनोज्ञा राजी च मालती सु
मनामता पीतजातपरा पीता पुष्पा कांचनपुष्पिका गुणा जाती लघुस्तास्तर्थादिदंतार्तिव्रणास्र
जित् मालतीनाम· मल्लिका मोदिनी मुक्तबंधना मुदयंतिका गुणा मालिका लालघूवृष्यावातपि

सर्पपत्राद्रि:

तास्त्ररोगजित् जूहीनाम यूथिकाद्रहणीवालापुष्पगंधानिविंदिनी सर्यायूथापरापीतागणिकास्व
णपुष्पिका गुणा यूथीद्विमास्त्रमूर्धादिरोगजित्कफवातहृत् कुंदानाम कुंदाभोमद्रूनहणी
वृहत्पुष्पामदाम्भहा शतपत्रीचसास्पुक्लाकर्णिकाचाहकेसरा रक्तपरारक्तपुष्पालम्बापुष्पानिमे
जला गुणा शतपत्रीद्विमाहृद्याग्राहिणीशुक्रलालघुः दोषत्रयास्रजिद्वर्णपाकुष्टकोपिचत
गुणाः केतकीस्वर्णकेतकीनाम केतकीसूचिकापुष्पाजंबुकः क्रकचच्छदः स्वर्णकेतकीना
मलघुपुष्पासुगंधिनी कटुकीकफपित्तास्त्रलक्ष्मतिक्ताकफापहा निवालीनाम वासंतीसारणी
कुमीनुस्रद्दत्तीवसंतजा गुणा वासंतीशीतलालघ्वीतिक्तादोषत्रयास्रणुत् वननिवालीत्रिपुजा
वेलनाम नीपालीग्रैष्मिकीलूताम्लापिनीवनमालिका वर्षिकेष्मुवजाकन्याश्रीमतीषट्पदप्रिया
गुणा नीपालीशीतलातिक्तालघ्वीदोषत्रयापहा कर्णादिमुखरोगघ्नीतद्गुणावार्षिकीमता माध
वीनाम माधवीमंडपः कार्यापुष्पेंद्रोभीष्टगंधकः गुणा माधवीमधुराशीतालघुर्दोषत्रयापहा
चाराकः नाम चंपकःकांचनोरम्भ्रश्चोपेयः सुरभिस्त्रलः चंपकः शीतलः हृच्छुकफपित्तास्र
वान्निजित् पुन्नागनाम पुन्नागःपाटलीपुष्पकेसरःषटपदालयः गुणा पुन्नागोमधुरः शी
तोरक्तपित्तकफापहा वोलसिवीनाम वकुलःकेसरोमद्यगंधः सिद्धविशारदः गुणा वकुलःशी
तलाःश्लेष्मपित्तदंतगदापहः तम्फलंवातलंग्राहिकोपपित्तहरंदिमं वागवट्टूलानाम: कुब्जव

नि॰
२०
20

कः स्थूलपुष्पोवासुकः शोवरस्तथा गुणा तुषः शीतोविषश्लेष्मपित्तकुष्ठापमदादहृत् कुंदस्तु कुं
दनाम कुंदः शुक्लः सदापुष्पोमर्दगवेधुर्मनोरमः गुणा कुंदः शीतोलघुः श्लेष्मशिरोरुग्विषमि
पित्तजित् मुचकुंदनाम् मुचकुंदः छत्रवृक्षः चिवुकः प्रतिविल्लुकः गुणा मुचकुंदः शिरःपी
डाघ्निस्त्रविषनाशनः बेल्वनाम भूमंडलेविचकिलोहिपदाष्टपदीतथा गुणा शीतोलघुर्वि
विकिलकफपित्तविषमःपरः तिलकनाम तिलकः क्षुरकः श्रीमान्चित्रोमुखमंडलः गुणा
तिलकः कफवातकुष्ठहरोमुसोरसायने गुणायानिनाम गणोहकाकणीकारंकर्णीश्चगणका
रिकः गुणा गणिकः शोदनीशोफश्लेष्मास्त्रव्रणकुष्ठजित् मरोणियानाम वंधूःजीवाशारसु
ष्पोवंधूर्वधूकरक्तकः गुणा वंधूकः कफकेशाहीवातपित्तहरोलघुः जपापुष्पनाम जपापु
ष्पंजपारक्तत्रिसंध्याप्यरुणासिता गुणा जपासंग्राहिणीकेश्यात्रिसंध्याकफपित्तजित् सिंदूरी
नाम सिंदूरीरक्तवीजंस्यारक्तपुष्पासुकोमला गुणा सिंदूरीविषपित्तास्त्रतृष्णावातिहराहिमा
तुलसीनाम तुलसीसुरसागौरीभूतघ्नीवहुमंजरी गुणा तुलसीकटुकातिक्ता हृद्योष्णारक्तपित्त
जित् मरुवानाम मरुन्मरुवकस्तीक्ष्णः खरपत्रः फणिज्जकः गुणा मरुदग्निप्रदोहृद्यस्तीक्ष्णो
ष्णः पित्तलोलघुः वृश्चिकादिविषश्लेष्मवातकुष्ठकृमीजयेत् दौणानाम दमनोमदनोदांतोदमो
मुनिसुतोमुनिः कंथोत्कदोदमनकोविनीतःकुलपत्रकः गुणा मदनोविषकुष्ठास्त्रक्लेदकंडूत्रि

दोषजित् वरवरीनाम वर्वरीवर्जकः कुंदीवैकुंठस्तान्तकुथेरकः कपिस्यार्जकस्त्वर्कोकुठपत्रः कं
टंजरः त्वलार्जकः कालमानः करालः कलिमार्जिकः गुणा वर्वरी त्रितयं रूक्षं शीतं कटु विदा
का॥ हि पित्तलं कफपित्तास्त्र दद्रु कृमिविषापहं ॥ इति मदनपालविरचिते मदनविनोदे तृतीयो वर्गः
अथ धातुवर्गः स्वर्णं कनकं हेम हाटकं भस्मकांचनं चामीकरं शातकुंभं तपनीयं च रुक्मकं जां
बूनदं हिरण्यं च सुरत्नं जातरूपकं गुणा स्वर्णं शीतलं वृष्यं बल्यं गुरु रसायनं इति स्वर्णनामा
नि॥ रौप्यनाम रूप्यकं रजतं रूप्यं तारं श्वेतं वसूत्तमं रूच्यं शीतं सरं वातपित्तहारि रसायनं ता
म्रनामानि ताम्रं म्लेच्छमुखं शुल्वं नेपालं रविनामकं गुणा ताम्रं सरं लघु स्वादु शीतं पित्तकफापहं
रोपणं पांडुकुष्ठार्शः स्तपुष्पश्वासकासजित् कांस्यनाम कांस्यलोहं निजं घोषं पंचलोहं प्रकाश
कं गुणा कांस्यं गुरु रूक्षं चाक्षुष्यं कफपित्तहृत्सरं पीतलनाम पीतलोहं रीतिं हलकं कपिलं
ते दन्तिमूत्रं विषार्शोघ्नं कुष्टगुल्मक्रिमीञ्जयेत् माहिषं शोफगुल्मार्शः पांडुमेहप्रयोज्जयेत्॥
आश्वं भेदि विशेषेण कफकंडूक्रिमीन् हरेत् आजं तु श्वासकासमलापांडुशोफजित् गार्दभं
ग्रहणीमेहकुष्टोन्मादक्रिमीञ्जयेत् औष्ट्रमुन्मादशोफार्शःक्रिमीष्ठीलोदरापहं नरमूत्रं गरं हं
ति सेविनं तु रसायनं गोजाविकमहिषीणां स्त्रीणां मूत्रं प्रशस्यते खरोष्ट्रेभनराश्वानां पुंसां मू
त्रं हितं मतं इति मूत्रगुणाः यो राज्ञां मुखतिलकः कठारमल्लस्तेन श्रीमदननृपेण निर्मितेन॥ ग्रं
थे मूत्रमदनविनोदनाम्नि पूर्णो वर्गोयं रसजरसमुद्भवोद्भवानां ॥ इति मदनपालविरचिते मदन
विनोदे निघंटौ द्रववर्गोष्टमः १४ मन्दाक्षितानेन हृषीति वक्रे प्रसारिते वीक्षनमोजनानि सविलासं
सादरं वीक्ष्यमाणं यशोदया नंदशिशुं नमामि अथेक्षुवर्गः इक्षुर्महारसो वंशो निस्तो गुडपत्र
कः तृणराजो मधुतृणं कोशकारी मधुपुष्पकः इक्षुमूलो लोहितेक्षुः पौण्ड्रकः पुंड्रकोपरः रसालः
कुसुमारोपितक लेशभीरु कोपुनः गुणाः इक्षुः स्वादुर्गुरुः शीतो वृष्यः स्निग्धो बलप्रदः जीवनो
वातपित्तघ्नः कफदो मूत्रकफक्रिमीन् समलो मधुरोपक्वं मधुरमधुररस एव च अग्रेग्रंथिषु विज्ञेयो
लवणो रसः तस्य लोहितेक्षुर्गुरुः शीतो दाहपित्तास्रमूर्छाजित् पौंड्रकः शीतलः स्निग्धो बृंहणः

४
40

कफकृत्सरः कृमिस्त्वल्ल्हणो वंशः क्षारः किंचिन्नतत्समः वंशवच्छातयोसोपि किंचिदुष्णः समीरजित्॥
कांतार सौतहृत्कष्टेक्षुर्वातलो हिमः कोशकार्यो गुरुः शीतो रक्तपित्तक्षयापहः सूचीपोत्रनीपरो नेपा
लो दीर्घपत्रकः वातलः कफपित्तघ्नः सकषायाविदाहिनः इति भेदादंतनिष्पीडितगुणाः दंतनि
ड़ि ष्पीते तस्ते षारसः पित्तास्त्रनाशनः शार्करः समवीर्यः स्यात् विदाही कफप्रदः गुरुर्विदाही विष्टंभि
यांत्रिकस्तु प्रकीर्तिता रसः सितानामखंडिका पलीमातंडीवलक्तया अन्यासितोपलाम्तुताप्ति
कताष्कत्रिकोमला खंडमन्यत् खंडसितामाध्वीमध्यशर्करा यवासशर्करान्यास्या यवासस्याथसं
भवा अन्यापुष्पसिता प्रोक्ता पुष्पसंस्कृतशर्करा फाणितं क्षुद्रगुडको गुडाल्लेक्षुरसोद्भवाः गुणाः
ठी मत्स्यांडिग्राहिणी वल्या गुरुः पित्तानिलापहा मोकल्लानाम सितोपलासरा गुर्वी वातपित्तहरा हिमा नि
वात खंडमक्ष्मवमादेयंपहृत्वं पुष्टिबलप्रदं खंडनाम माधवी शर्करा रूक्षा कफपित्तहरा गुरुः मधु
शार्करनामगुणाः फाणितं गुर्वभिष्यंदि दोषलं मूत्रशोधनं गवनामगुणा मधूकफाणितं वा।
स्निग्धं गुरुं वातपित्तलं मधूकतंत्रनामगुणाः यवासशर्करा शीता वातला कफपित्तजित् यवास
शर्करानामगुणा शीता पुष्पसिता हृद्या रक्तपित्तहरा गुरुः पुष्पजा मितशर्करनामगुणाः
गुडः क्षारो गुरुः स्वादुर्वातपित्तानि कृन्तसरा वल्यः क्रिमिश्लेष्मकरो मूत्रजरक्त विशोधनः जीर्णो हृद्य।
योलघुः पथ्यानाभिष्यंद्यग्निपुष्टिकृत् [illegible] गुडनामगुणाः इक्षोर्विकारा विमलायया [illegible]

४

गुणास्तथा नष्टदाहमदोपिनास्त्रविषमोहहरा हिमा गुरवो मधुरा बल्याः स्निग्धा वातहराः सराः
इति इक्षुवर्गः ॥ अथ मधुवर्गः मधु पुष्पासवं पुष्परसं माक्षिकमीरितं माक्षिकं पौत्तिकं क्षौद्रं
भ्रामरं मधुविस्तरात् माक्षिकं तैलसंकाशं पौत्तिकं घृतसन्निभं क्षौद्रं कपिलवर्णं स्यात् भ्रामरं
स्फाटिकामलं गुणाः मधु शीतं लघु स्वादु रूक्षं कषायं ग्राहि लेखनं चक्षुष्यं दीपनं स्वर्यं व्रणशोध
नरोपणं वर्ण्यं मेधाकरं वृष्यं विशदं रोचनं जयेत् कुष्ठार्शःकासपित्तास्रकफमेहक्लमक्रिमीन्
मेदस्तृष्णावमिश्वासहिक्कातीसारविड्ग्रहान् दाहक्षतक्षयांस्तत्तु योगवाह्यल्पवातलं माक्षिकगुणाः
माक्षिकं मधुषु श्रेष्ठं नेत्र्यं मधुहरं परं पौत्तिकगुणाः पौत्तिकं लघु रूक्षोष्णं पित्तदाहास्रवातनु
त् क्षौद्रगुणाः क्षौद्रं माक्षिकवत् ज्ञेयं विशेषान्मेहनाशनं भ्रामरगुणाः भ्रामरं रक्तपित्तघ्नं
मूत्रजाड्यकरं लघु नवनगुणाः नवीनमधु भिष्यंदि दिस्निग्धं श्लेष्महरं सरं ॥ पुराणपु
दिकं गुणाः पुराणं ग्राहि तद्रूक्षं मेदोघ्नमतिलेखनं विषाक्तपुष्पपृष्ठेभ्यः सविषा माक्षिका
दयः मधु विनयंति तस्मात्तु स्वभावात्सविषं स्मृतं तस्मादुष्णमुपादानं तद्युक्तं हन्ति मानवं ॥
उष्णकाले च देशे च द्रव्यैरुष्णैर्नियोजितं निरूहे वर्दिने चैतो न दुष्येन निवार्यते यस्मात्पाकम
लब्ध्वैव तद्योस्तु हि निवर्तते आमाशये ज्वले नापि तद्दुष्येन विरुध्यते इति मधुगुणाः म
दनं मधुजं स्निग्धं मधूच्छिष्टं मधूषितं इति सिर्थनाम गुणाः मदनं मृदु सुस्निग्धं भूतघ्नं

नि॰
४१
41

व्रणरोपणं भग्नसंधानकृद्दातकुष्ठवीसर्परक्तजित् इति मधूननामगुणाः ॥ इति श्रीमद
नपालविरचिते मदनविनोदनिघंटौ मधुवर्गो वर्गः नवमः ९ अज्ञानमरणं वहुजन्ममरणं तु नमा
लभासं विषदप्रकाशं मुक्तिप्रदं वहुमलं तु विलेन त्रैलोक्यतां तणिमुमाश्रयामि अथ धान्यव
र्गः शालयो रक्तशाल्याद्या व्रीहयः षष्टिकादयः मुद्गादिर्वैदलं शिवकं स्वादितृणधान्यकं ॥
द्वाद्रयामं कुधान्यं नव्हं कधान्ययवादिकं रक्तशालिर्लोहितः स्यात् हुडः शकुनाहृतः सुगं
धिको महाशालिः कलमस्तु कलामकः रक्तशालिर्दीर्घशूकः पुंड्रे मदिषमस्तकः हरिणं च
द्रो महाशालिः पुंडरीकप्रमोदकः पुष्पंडकः शीतभीरुः कांचनः शाकुनाहृतः पांडुगौरः
शारिवाख्यो लोध्रपुष्पः सुगंधिकाः इत्यो नदीर्घनालश्च महादूषककर्दमको गुणा शालयो
मधुराः स्निग्धा बल्या वद्धाल्पवर्चसः पित्तघ्नाल्पानिलकफा मूत्रलालघवो हिमाः रक्तशालि
र्वरस्तेषां बल्यो वर्ण्यस्त्रिदोषजित् चक्षुष्यो मूत्रलः स्वर्यः शुक्रलस्तृट्ज्वरापहा विषव्रणहरः
किंचित्तस्मादल्पगुणाः परे महाशालिः परं बल्यो रक्तशालिर्गुणैः समः षष्टिकः कांगुलः
क पीतप्रमोदमुकुंदकः महाषष्टिककेदारपुष्पाकुरवकादयः षष्टिका मधुराः शीता लघु
वो वद्धवर्चसः वातपित्तप्रशमनाः शालिनीसदृशा गुणैः षष्टिकः प्रवरस्तेषां लघुस्निग्ध
स्त्रिदोषजित् पाकी स्वादुर्मृदुग्राही स्थैर्यकारी बलप्रदः रक्तशालिगुणैस्त्वल्पस्तस्माद

ल्पगुणाःपरं कलव्रीहिर्लवितकः कुक्कुटांडकपाटलः शालामुखिमलावाहोनंदीजंतमुखादयः
व्रीहयोमधुराः शीताः षष्टिकानांगुणैः समाः कलव्रीहिर्वरस्तेषां तस्माद्ल्पगुणाःपरं शालयोट
ग्यभ्रजाताल्लघुरूक्षाकफापहाः स्थलजाः स्वादवः पित्तकफघ्नावातवह्निदाः केदारेवानपि
त्तघ्नागुरवः कफशुक्रलाः रोप्यातिरोप्यालघवोमूत्रलास्तेगुणोत्तराः छिन्नरूढाहिमारूक्षाः
पित्तघ्नालघुपाकिनः गोधूमनाम गोधूमः सुमनः स्त्वद्धोमधूलीतपिशीतिकाः नंदीमुखोल्प
गोधूमोलोकशालीयोलिकोमुच्यते गुणाः गोधूमोमधुरः शीतोवातपित्तहरोगुरुः कफशुक्र
प्रदोबल्यः स्निग्धः संधानकृत्सराः एतस्मात्स्थूलगोधूमात्स्वद्धेदीनतरोगुणैः यवनाम
यवः स्मृतिः तीक्ष्णाग्रकोनिग्रकोतियवोपरः गुणाः यवः कषायोमधुरः शीतः पित्तकफा
स्त्रजित् व्रणेषुतिलवत्पथ्योरूक्षोमेधाग्निवर्धनः लेखनोबद्धनिष्यंदः स्वर्योमेदस्तृषापहः
बहुवातमलस्थैर्यवर्णकारीसपिच्छलः अस्मादतियवः किंचिद्गुणैर्न्यूनतरः स्मृतः इति
यवनामगुणाः अथशिंबानाम शिंबामुद्गभ्रव्रणोमाषाशानीनः सेकलायकः मसूरश्चक्र
मंगल्यामकुष्ठन्निष्पुटाटयः वैदलामधुरारूक्षाः कषायाःकटुपाकिनः वातलाःकफपित्तघ्नाव
द्धमूत्रमलाहिमाः ऋतेमुद्गमसूराभ्यामन्येत्वाध्मानकारकाः वैदलाशिंबिविष्टंभिनोमे
दहृषित्रावातपित्तलाः विषदागुरवोल्हयाः रूक्षाःकटुविपाकिनः सितासितादिभेदेनबहुधा

नेप्रकीर्तितः सेविमङ्गोबलाटोमंगल्योः हरितः शारदोयमः श्वेतः श्वमेकोवसकोमायवः प्रवरो
सितः वनमुद्गस्तुवरकोराजमुद्गस्तखंडकः गुणाः मुद्गोरूक्षोलघुर्ग्राहीकफपित्तहरोहिमः
स्वादुरल्पानिलोनेत्र्योवन्योप्येतद्गुणोमतः हरितः प्रवरस्तेषांतद्धाकंतिनामत्तमं इतिमुद्गगुणाः
अथमाषनामगुणाः माषोवीर्यवरोयारिस्तुवरोराजमाषकः माषोगुरुःस्वादुपाकःस्नि
ग्धोवृष्योनिलापहः उष्णःसंतर्पणोबल्यःशुक्रलोबृंहणःपरंभिन्नमूत्रमलस्तन्यमेदःपि
त्तकफप्रदः गुदकीलार्दितःश्वासपंक्तिशूलानिनाशयेत् राजमाषगुणाः राजमाषःस्वादु
रूक्षःकषायस्तर्पणोगुरुः ग्राहीवातकरःस्तन्यवृद्धवीर्योरुचिप्रदः चौलालावबृही मयुष्टको
मकुष्टःसान्निष्पावोवलकतमनः गुणाः मकुष्टोवातलोग्राहीकफपित्तहरोलघुः वह्निजिन्म
धुरःपाकेक्रिमिकृज्ज्वरनाशनः इतिमोठनाम अथनिष्पावनामगुणाः निष्पावोतिर्जीपित्त
स्तमूत्रस्तन्यकरःसरःविदाह्युष्णोगुरुःशोफकफकृच्छूक्रनाशनः वटरीनाम वटलवर्त
लस्तुसतीनःसाद्धरेणखस्पवर्तुलः वर्तुलःशीतलोग्राहीकफपित्तहरोलघु विपाकीम
धुरोरूक्षोदरेणगुणःस्मृतः कलहरोकोराढनामगुणाः कलायःचंडिकेप्रोक्तोत्रिपटः
स्वादुपंडिकःकलायःकफपित्तघ्नोग्राहीशीतोतिवातलः त्रिपुटोपिगुणैरेवंतद्धाकंकफपित्तजि
त् अथचनकनामगुणाः चणकोहरिमंथकःसाहाजिमंथश्चजीवनः चणकःशीतलोरूक्षः

पित्तरक्तकफापहः लघुः कषायो विष्टम्भि वातलः पुंस्त्वनाशनः मसूरनाम मसूरिका मसूरस्या
न्मंगल्यः पांडुरः परः गुणा मसूरिमधुरः पाके संग्राही शीतलो लघु कफपित्तास्रजिद्वा पित्तघ्ना
कं लघु तिक्तकं कुलत्थगुणा नाम कुलत्थस्ताम्रिकश्चकः कुलीरवनजः परः कुलत्थः कटुकः
पाके कषायः पित्तरक्तकृत् लघुर्विदाही वीर्योष्णः कासश्वासकफानिलान् हंति हिक्काश्मरी
शुक्रदाहानाहान्सपीनसान् स्वेदसंग्राहको गुल्ममेदः कृमिहरः वल्यो विशेषतः शीतोने
त्रामयविषापहः तिलनाम तिलः स्नेहतैलफलस्तिलः पिंजोपरः सितः जतिलो वनजा
तः स्याद्दाडकी तुवरी मता गुणा तिलो ग्राही गुरुः स्वादुः स्निग्धोष्णः कफपित्तलः वल्यः केश्यो
हिमस्पर्शस्त्वच्यो व्रणहितः परः दंत्योऽल्पमूत्रकृद्वातनाशनाग्निमतिप्रदः कृष्णश्रेष्ठतमस्तेषां
शुक्लो मध्यमः स्मृतः अन्ये हीनतराः प्रोक्ता तज्ज्ञैः रक्तादयः तिलाः तुवरीनाम तुवरीग्रा
हिणी शीता लघुः कफपित्तास्रजित् अतसीनाम अतसी मसृणा नीलपुष्पा चेलुहमाच्छ
ता गुणा अतसी मधुरा तिक्ता स्निग्धोष्णा वातजिद्गुरुः कुसुंभनाम कुसुंभपात्रनपीतमल
कं वस्त्ररंजनं तद्बीजं किरटालत्वाशुद्धापमौनदानया गुणा कुसुंभं वातकृत्कृच्छ्ररक्तपित्त
कफापहं किरटालावर्टिद्दाविशेषाद्विषनाशिनी सरसौरानाम सर्षपः कटुकस्नेहो
भूतघ्नो रक्तिकाफलः तुरंभोमः सतुद्दिम्पः सिद्धार्थः सेतसर्षपः राजिकाचारी राज्जीसतोला

नि.
४२
43

कृसस्सर्षपः गुणा सर्षपाकवानत्युष्णः तीक्ष्णोरक्तपित्तकृत् किंचिद्रूक्षोग्निदः कंडूकुष्ठकोष्ठ
क्रिमीजयेत् राजिकातद्गुणास्तेयातीक्ष्णातीव्राविशेषतः धारानाम प्रोक्तोमातुलानीजंतुस्तं
तुर्मदाशनः गुणा शमोहिमोगुरुर्ग्राहीतत्सुष्यप्रदास्त्रजित् अथशालादयः कंगुभेदा
नाम कंगुः श्यामाकनीवारवाराकद्दालमेतकाः वरट्टिकानोट्यणीकोद्रवश्चमधूलि।
का नंदीमुखीवेणुयवाप्रियंगुः कोरदूषकः गवेकानलोनालीमुकंदवरकाटिकं गुणाः
तृणधान्यमलघुस्वादुः कटुपाकिविलेखनं रूक्षोलेवहुविष्टंदवातकफपित्तकोपनं पीततंदु
लिकाकंगुः प्रियंगुरुः कुकुटीमता सितकंगुलमधूटीरक्तकंगुस्तु शोटिका चीनाकः का
ककंगुः स्यात् श्यामाकस्तृणवीजकः शालादयः कंगुभेदाः कोद्रवः कोरदूषकः ———
— — — — — स्वादुद्दालोवनकोद्रवकः प्रियंगुः पित्तजिद्दृष्याभग्नसंधानकृद्गुरुः श्यामाकः शो
षणः शीतोरूक्षः पित्तकफापहः गुणा कोद्रवः शीतलोग्राहीविषपित्तकफाञ्जयेत् कोद्रव
नाम नीवारउद्दिकावोडीसुनिवृत्तिःशृङ्गविप्रियः गुणा नीवारः शीतलोग्राहीपित्तघ्नः कफवात
कृत् जासवूनाम यवनालोदेवधान्यजूर्णदल्लिर्जूललोनलः गुणा यवालः स्वादुशीतो
वातलः कफपित्तजित् जटलीनाम गवेधुकाकषेणीसाज्ञोजिह्वाकर्षिकामता गुणाः ग।
वेधुकाकटुःस्वाद्वीक्ताशयंकृत्कफनाशिनी गिरित्रयानाम अथयोनंव्याधिहृतमवानंवमन्ह

मिश्रं नवं ज्वलादिभिर्जनेषु नयानं गुणावनात्म गुणा धान्यं नवमभिष्यंदि गुरु स्वादु कफप्रदं वर्षोषि
तं सर्वधान्यं गोरवं परिमंचति नमंचति तद्वीर्यं क्रमान्मुंचत्यतः परं विदाहि गुरु विष्टंभि विरूढं दृष्टि
दूषणं एतेषु नव गोधूम तिल माषा न वाहिताः गुडाः पुराणा विरमा न नत्याग गुणकारिणः ॥
इति श्रीमदनपालविरचिते मदनविनोदे निघंटौ धान्यवर्गः दशमः १० राधा हरिचरयोः पतितं क
राम्भोकोपाच्चयानतनद्विस्वप्नर्हसंततनाद्योसमपतश्च किराभिन्ना तोमं प्यापपंजयति नवमोप
देष्टः अथ कृतान्नवर्गः आहारो भोजनं जग्धिर्निघसोप्युपनेनया आहारो बलकृत्सद्यः प्रीणनो
देहधारकः उत्साहसेः स्मरोल्लासहृष्टि तिस्मृतिमतिप्रदः आहारः ॥ भक्तमंडस्तु भिस्मीने कूरं दीदिविरो
दनः गुणाः भक्तं वह्निकरं हृद्यं तर्पणं मत्रं लघु आधौतममलं तं शीतं गुरु वृष्यकफप्रदं स्वष्टंत
डुलं जनेरूवं सुगंधिकफजिल्लघु भक्तं मांसफलं दीपं दलाद्याद्दिसाधितं मेदशाकैश्च गुरु तहूष्यव
ल्यं कफप्रदं रक्षोघ्नः चगुरुर्दृष्योबलोवानकफापहः गोलभक्तं ग्रहणपर्शीः श्रमशुद्धपाचनं दि
मं यवागूर्लघ्वी कृता नीयसेसिद्धा विरलद्रवा चतुर्गुणांबुसंसिद्धा वाली पोगनसिक्थका पेयासिक्थ
विता तोयेचतुर्दशगुणे कृता मंडस्ववद्दशगुणेसिद्धस्वमयंत्रसिक्थकः इति पेयादिलक्षणं यवा
गू ग्राहिणी तत्साज्वरघ्नी बस्तिशोधिनी ॥ इति यवागूगुणाः विलेपी दीपनी बल्या हृद्या संग्राहिणी लघुः
व्रणाक्षिरोगिणां पथ्या तर्पणी तृड्ज्वरापहा विलेपीगुणाः पेयाकुक्षिगदश्लांतिज्वरलेभातिसा

रजित् रुच्याग्निकृल्लघुर्दोषघ्नः श्रमसेदानुलोमनी इतिपेयागुणा मंडो ग्राही लघुः शीतो दीपनो धा
तुसाम्यकृत् स्रोतोमार्दवकृत्क्लमीहृज्वरश्लेष्मश्रमापहः मंडगुणाः वाट्यमंडो यवैर्भृष्टैः लाजामंड
स्तु शालिभिः वाट्यमंडो लघुर्ग्राही हृद्यः पाचनदीपनः वाट्यलाजामंडगुणाः तंडुलैर्भृष्टैः
किंचित् भृष्टैः सुपाचितः हिंगुसिंधूत्थधनिकानकत्रिकटुसंस्कृताः ज्ञेयः सोष्टगुणो मंडो ज्वरदोषत्र
यापहः रक्तस्य वर्धनः प्राणप्रदो वस्तिविशोधनः इत्यष्टगुणमंडः यूषः मसूरो वै दलो नाम
ष्टदशगुणं भवेत् मुद्गानामुद्गमो यूषो दीपनः शीतलो लघुः हरेणो धूर्जेत्तहृदा हकफपित्तज्व
रास्रजित्॥ इतिमुद्गयूषः दाडिमामलकैर्यूषः पित्तवातहरो लघुः दाडिमालसकैर्यूषः मुद्गाम
लकयूषस्तु भेदनः कफपित्तजित् त्रिदृदाहशमनः शीतोमूर्छाभ्रममदापहः मुद्गामलकयू
षः कुलत्थयूषो गुल्मार्शः कफवातापहः शार्करः तूणीप्रतूणीमेदोसि मेदहन्मग्रिकृत्तरः इ
तिकुलत्थयूषः मुस्तामलकयोर्यूषो गलग्रहकफज्वरान् इति श्वासप्रतिश्यायकासमंदाह।
चिक्रिमीन् स्यविमूलकयूषः चणकैर्विहितो यूषो डलसुवरको लघुः रक्तपित्तप्रतिश्यायका
सपित्तकफापहः इतिचणकयूषः मकुष्टयूषः संग्राही पित्तश्लेष्मज्वरापहः लघुःसंतर्पणः
पथ्यो हृद्यः पीनसकासजित् इतिमकुष्टयूषः यूषः कृतः सममरिचः लवणस्नेहसाधितः स्ने
हतैर्विनासिद्धः क्रमाद्गुरुलघुश्च तौ इति कृताकृतयूषः यूषो गोरसधान्याम्लफलाम्लादि

भिरन्वितः पथ्योन्नं गुरु नरा वातघ्नाऽहचिकारिणः गुरुलाघवमुद्दिश्य कथ्यते यैरत्नैरोषधैर्यच्च कृतामं
डटयो बुधैः निराम्यतद्गुणानेतांस्तद्गुणामेवनिर्दिशेत् पूर्वेनुस्तत्य कोन्यैः मिश्रितैः मिस्रषैः कृ
तः स्तव्य विष्टंभिरुक्षसात्विरम्लं तविशोषणः निस्तुष्य न्यस्तभिन्नेतलाघवं सुनरो व्रजेत् इति दाली॥
क्वचित्समाषैः क्वाप्येवकृसरा तिलतंडुलैः कृसरा कवलग्राह्या सिद्धा तंडुलवैदलैः गुणा कृस
रा शुक्रला बल्या गुरुः पित्तकफप्रदा दुर्जरा पुष्टिविष्टंभमलकृद्वातनाशिनी॥ खिचरी नाम गुणाः
खिच्चापि तद्गुणा सेषा खधान्य गुणकारिणी खिरडी क्षीरे यी परमान्नेस्मान्यायसं क्षीरतंडुलैः॥
क्षीरेयी दुर्जरा बल्या वातपुष्टिप्रदा गुरुः विष्टंभिनी हरेत्पित्तरक्तपित्ताग्निमारुतान् इति क्षीरगुणाः गु
डादिपक्वं कथितमाममाम्रफलेन तथा सितैलानागरैर्युक्तं स्यात्खंडो रागखंडवः इति रागखंडवः॥
सिताकृचकुस्तिंधुरस्यैः सहद्राक्षापरूषकैः जंबूफलरसैर्युक्तो रागो राजिकया कृतः खांडवो मधुरा
म्लादिरससंयोगसंभवः दीपनो बृंहणो रुच्यातीव तथा हृद्याम्लमाषहा आम्रामलकमेहाद्याहृद्या
पुष्टिबलप्रदाः तर्पणा रोचना स्निग्धा मधुरा गुरवस्तथा षंडाम्लषंडामलकनामगुणाः मस्तितं दधि
मध्वाज्यमरिचैलादिसंस्कृतं मथितं कातकापिण्याककर्पूरपरिवासितं रसाला शिखरिणी प्रोक्ता
मार्जिता मार्जिका बुधैः रसाला शुक्रला बल्या रोचनी वातपित्तजित् स्निग्धा गुरुः प्रतिश्यायान्विशे
षेण विनाशयेत्॥ इति शिखरिणीनामगुणाः द्राक्षाम्लिकापरूषादिजले खंडादिमिश्रिते मरिचा

४५ नि
45

ईक्षुकर्पूरचन्दनजातादिसंस्कृतं पानकं द्विविधं तत्स्यादम्लं चाम्लविभेदतः द्राक्षाखर्जूरिकाश्मर्यसम
धूकपरूषकैः पंचसाराद्भिः पानं चंद्रपूर्णादिवासितं गुणाः पानकं मूत्रलं हृद्यं प्रीणनं तृट्श्र
मापहं यथाद्रव्यगुणं तत्तद्गुरुलघ्वादि निर्दिशेत् पंचसाराभिधं पित्ततृष्णादाहश्रमापहं मा
र्द्वीकं श्रमदाहास्रपित्तं क्लमकफापहं परूषकानां कोलानां हृद्यं विष्टंभि पानकं अम्लीकायाः
सारं कृत्वाक्तिमिदाहश्रमापहं इति पानगुणाः तिल्लेहं दधि निर्मथ्य पटे शर्करयान्वितं सव्योषद्रा
डिमाज्याजि मद्गकाय मुदाहृतः गुणाः मद्गको रोचनः स्वर्यः पित्तानिलहरो गुरुः दीपनः स्वादुपाको
बल्यः श्रमक्लमतृषापहः इति मस्तकनाम गुणाः कुकूलकर्परभ्राष्टकंडांगारेण पाचितं मं
डकाद्याद्यथापूर्वं गुरवो बृंहणा मताः मंडको विस्तृतः स्थूलः कर्परादिषु पाचितः सएव किंतु स्थू
लस्तु बुधैः पूपलिका मता अंगारकर्कटी सैव विज्ञेया गारपाचितः गुणाः अस्तु स्यामंडकः पथ्यः
शीतः सगुरु उच्यते अंगारमंडको ग्राही लघु दीर्घ्रेजयापहः पोलिकाकफकृद्बल्या पित्तला वात
नु गुरुः दीपनी कफहृद्रोगपीनसश्वासवातजित् मात्रापोली अंगारकी घोरीनाम गुणाः शालि
पिष्टकृता भक्ता नातिबल्या विदाहिताः अवृष्या गुरवश्चोक्ताः कफपित्तप्रकोपनाः शालिभक्ता
नाम ।। गोधूमविहिता भक्ता बल्याः पित्तानिलापहाः वैदला वातला भक्ता गुरवो लवराहिमाः ।।
गोधूमनाम गुणाः माषपिष्टकृता भक्ता बल्याः पित्तकफप्रदाः विचार्यान्य गुणास्त्वन्यास्तन्मान

पिष्टिनिर्विदेशात् गोडिकागुरवोभसावातज्ञाकफासृक्कला गुडपूपोभवन्नामगुणा घृतयाविनभ
स्तत्त्वबलः पित्तानिलापहः घृतपक्वनामगुणाः तैलजातकसमीरघ्नाः उष्णापित्तास्त्रदूषिणाः
तैलपक्वनामगुणाः दुग्धालोडितगोधूमशालिपिष्टादिनिर्मिताः वातपित्तहराभक्ष्याः हृद्या
शुक्रबलप्रदाः दुग्धभक्ष्यनामगुणाः क्षीरेणमर्दितंचूर्णंगोधूमानांतुगालितं विस्तार्यसर्पिषा
पक्वांततः श्वेताविमिश्रितं घृतपूरोयमुद्दिष्टः कर्पूरमरिचान्विताः सितानामर्दिताक्षीरेण
विकीलसितादिभिः खंडवगास्यघृतेपक्वघृतपूरोपरः स्मृतः घृतपूरोगुरुर्वृष्यो हृद्यपित्तानि
लापहः सद्यप्राणप्रदोबल्यः वातजित्वंहृदुणः परः घेवरनामगुणाः समितासर्पिषाम्लिष्टः
श्वेतामरिचमिश्रिताः एलालवंगकर्पूरचूर्णादिपरिसंस्कृते द्विबान्यसेमिताल्लाक्ष्युपुटेषुसंघृ
तंपचेत् ततः खंडेन्यसेत्सकेसयावेयम् दाहतः शमितामेवदुग्धेनमोदयित्वाहशोभनः॥
पचेत् घृतोत्तरं खंडंन्यस्यसक्तंनवेष्टयेत् ततोमरिचचूर्णेलाखंडचूर्णावचूर्णितं कुर्यात्कर्पूरसं
युक्तंसंयावममतोपरं गुडसंयावनाम मर्दयित्वाहशमितामपयास्तनवः कृता पक्वाघृते
सितापाकमंडितामधुशीर्षकः घृतेनमर्दितातोयैः शमितोमरदुमर्दयेत् मातुलेगत्वचावे
ष्टयाक्रमाद्र्दकपूरितं विधायापूपकंपक्वंतैलेनैवयशर्करान्वितं पक्वासर्पिषिखंडावगाहितंमधुशी
र्षकः याज्ञासमितंगुडतोयेनमलयित्वासगालितं घृतेविस्तार्यविपचेत्सवृत्तान्दृदुपूपकान्॥

गुल्मानाम॥ शालिपिष्टघृतं दध्ना मर्दयित्वा घृते पचेत् वेष्टयेत्पक्वविडेन सुवृत्तान् दधिपूपकान् इक्षिरव
रीनाम संयावास्तथा शीघ्रीयाः पूपकाः दधिपूपकाः गुरवो वृंहणा हृद्याः वृष्याः पित्तानिलापहाः॥
एते संस्कारभेदेन विविधास्तेषु तद्गुणाः दधिक्षीरसमे पक्वास्त्र्यंशभागावशेषिते स्रावयेद्वस्त्र शालिनां
तंडुलास्तिलसंयुक्तान् पियालपनसाम्राणां बीजमुष्टीः समापदेत् क्षीरतुल्यं घृतं चैव शर्कराम्ल
महागुणा सितहस्तिकटुकोपेताः कर्पूरेणाधिवासिताः एवं विष्पंदनो नाम देवलोकेपि दुर्लभः
यस्मात्सकोपि हि द्वृतस्यंदने सर्वतो मुखं तस्मात्सूपमिना तज्जैर्विष्यंदनः इति स्मृतः विष्पंदो वृंह
णो हृद्यः पित्तानिलहरो लघुः इति विनिष्यंदपालोटनाम सनितां मर्जयेत्तक्रे घृतं श्वेतां ततो न्यसे
त् क्षारमज्जादिसंयुक्तं पयसा योजयेत्सदा एवेलादिघृतातैस्तैस्सिकाललिनाम ता लप्सिका वृं
हणी वृष्या वातपित्तहरा लघुः लपसीनाम फेणिकापुष्टनी भग्ना वातपित्तहरा गुरुः लवणं फ
णिकादीनां स्वपघालाद्विचारयेत् फेणीनाम मोदका लड्डुकाः प्रोक्तास्ते वानेकविधा मताः द
धिक्षीरं तक्रदुग्धं शमिता माषपिष्टकाः सूरणार्द्रककूष्मांडशालूकाभिषमस्तकाः इत्यादि
भिर्बहुविधाः कल्पास्तेस्तु दशास्तुतः द्रव्यं विचार्य मतिमांस्तद्गुणान् विनिर्दिशेत् मोदका दु
र्जरा वृष्या बल्याः पित्तानिलापहाः इति लड्डुनाम गुणाः माषमुद्गादिपिष्टोत्था वटिका वटका
कादयः तत्कारणगुणान् ज्ञात्वा तद्गुणान् विनिर्दिशेत् माषाणां वटको हृद्यो बल्यो वातहरो लघुः।

त्वुः विष्टंभी चोटको विदाही पवनापहः वरीवटा नाम वंडचोलवटा शंडाकी वटकाद्दष्टिनीशनो
दोषलो गुरुः इति शंडाकेवटको नाम गुणाः तृष्णा वुवटको रुच्यः पित्तलः कफवातजित् तृषी
वुवटका नाम गुणाः इड्डरी सुकला रुच्या विष्टंभकफवातहृत् इडरी नाम गुणाः सोमोलिका
गुरुर्हृष्या रोचनो दोषनाशिनी सोपारी नाम गुणाः द्विप्रस्थाम्बुहृशमिता प्रस्थं गोधूमलालितं
विमर्द्य पयसा स्य[illegible]याव द्द्रुज्जोतदल्पतां सच्छिद्रनारिकेलस्य पात्रे निःक्षिप्य निर्मले परिभ्राम्य प
रिभ्राम्य घृते तप्ते विपाचयेत् कर्पूरवासिते साध्वी विधिनृपवल्लभः सुपक्वा कंकणाकारा सिता
लेहे विनिक्षिपेत् सातकुंडलिका नाम पुष्टिको तिबलप्रदा धातुवृद्धिकरा हृष्या स्वाद्या चेंद्रियत
र्पणी तत्साम्लत्वमा यात्यां न्यसेज्ज्ञो धूमगालितं इति कुंडलिका जिलेबी तिलो के नाम गुणाः
गोधूमाद्याम्लकुल्माषाः स्विन्नास्विन्नमतीकृचित् गुल्माषा गुरवो रूक्षा वातला भिन्नवर्चसः
लघुरी नाम गुणाः नवीननिस्तुषो भृष्टयवचूर्णं तु सक्तवः सालू नाम गुणाः सक्तवल ज्ञ
ता भक्ताः शीतवारिविलोडिताः नातिद्रवो नातिसांद्रो मन्थः सद्भिः प्रकीर्तितः मन्थो बलकरः
सद्यः परिणामे बलापहः मेहत्सादयच्छर्दि कुष्टदाहश्रमं जयेत् द्राक्षाक्षितेक्षुखर्जूरैर्मि
श्रः पित्तास्रवातजित् द्रवा नामधुयुतो बल्यः कफस्रमभदापहः वर्गत्रयसमायुक्तो दोषवर्चो
वलोमनः मलू नाम गुणाः सक्तवोपवजा शीता दीपनाः लघवः सराः कफपित्तहरा रूक्षा

लेखनाः पानतस्तते सद्यो बलप्रदाः पथ्याज्जर्मादिव्लात दोहितं निस्तुषैर्भर्जितैः पिष्टैः चणकैः स
यवैःकृताः सक्तवः शार्करासर्पिर्युक्ता ग्रीष्मे तिप्रूजिताः पिंडो प्रोक्ता गुरुस्तेषां द्रवत्वा लेहिका लघुः॥
नभुक्त्वा न रदैश्छित्वा न निशायां न वा बहून् न जलोत्तरितान् द्विः सक्तान्नाद्यान्न केवलान् सथैना
मगणा भ्रष्टशालादिजा लाजा धानाभ्रष्टयवोद्भवाः लाजा लघुतराः शीता बल्याः पित्तकफाप
हाः छर्द्यतीसारदाहास्त्रमेहमेदस्तृषापहाः लाजानाम पक्ववा धाना विष्टंभिनी रूक्षा कफमे
दोहरा गुरुः धानीनामगुणाः पक्कार्द्रब्रीहयः सम्यक्पीडिताः पृथुकामताः गुणाः पृथुका
गुरवो बल्याः श्लेष्मला वातनाशनाः चिपुरानामगुणाः शिंबिधान्यैरधेपक्वैः सुभ्रष्टैर्लोहकोमतः
लोहकोल्लानिलो मेदः कफदः पक्वभावनः होलाख्यपक्वभ्रष्टगोधूमे हलंबोलं युलेविका तेवी
कफप्रदा रुच्या लघुः पित्तानिलापहा तद्धीनामगुणाः अथ पक्वमांसगुणाः तैलतमांसगुणाः
हिंगुतैले घृते दत्वा मांसमालोड्य भर्जितं मात्रयोस्ताबुनिदिध्यध्ये चेत्सम्यग्विचक्षणाः मरिचार्द्रकसं
युक्तं सुगंधि द्रव्यवासितं शानद्रव्यमयाम्बलं परिभृष्टं तदुच्यते चनद्रव्योपलिप्तं तत्स्वादिष्ट मितिकीर्त्य
ते पिष्टमांसनाम रसेनयुक्तं सरसं भूलं भूलेन संस्कृतं परिभृष्टं स्थिरं स्निग्धं रोचनं तर्पणं गुरु॥
बलमेदोग्निमांसौजः शुक्रवृष्टिकरं परं तदेवं लिप्तमिष्टस्वादुलिप्तमितिकीर्त्यते पिष्टभृष्टमांसना
म॥ तलितं गुरुतर्पणं तस्मात्भृष्टकसमंगुणैः प्रदिग्धेवातजिद्बल्यं गुरु शुक्रविवर्धनं सरसं तद्गु।

णं स्तेयं विशेषाल्लघु दीपनं प्रोक्तं स्थले न पिष्टितं सौरभाद्यं बुनामतुङ्गः लिप्त्वा विधूमैरङ्गारैः पाचितं स्थल
मुच्यते स्थलं सर्वं तन्मंसं मांसं लघु पथ्यं तन्मतं स्थलपक्वं नाम गुणाः अङ्गारादिषु पक्वं प्रतप्त
त्रुदाहृतं अङ्गारभ्रष्टं प्रतप्तं मांसं दाडिमसिद्धं सौरभादिसमन्वितं पिष्टापूपादिसंकल्पपक्वं
पिष्टमिति स्मृतं पिष्टमांसस्तूपादि भर्जितं स्नानं चूतादीन् स्पष्टाय स्वाधितं पुनः चूतादिस्पष्टमां
सं मांसं सौरभं संलिप्तं कंडूपक्वं मधुप्रभं तन्स्वरपक्वं प्रदग्धं सरेपिष्टं भर्जितं कंडूपाचितं प्रत
प्तपरिपक्वं च मूलं यथा स्वादी हशो मांसं तैलेन संसिद्धं तद्वीर्यं लघु रूपितं तले तैलपक्वं मांसं मांसं
सस्मार मलिप्तं गंडुपक्वमिति प्रभं रतिकं डूरपक्वं चूतपक्वं न देवस्यात्लघुरुचिमपि तले स्त्रुत्युल
वीर्यं बलदेहदृष्टिप्रसादनं चूतपक्वं गोरसस्वरद्धान्यफलाम्लकटुकादिभिः स्निग्धं मां
सं भवेद्बल्यं रोचनं दीपनं गुरुः भक्तादिसिद्धं मांसमामरसं स्तुत्यं विरसं बाल्यं गुरु तक्रादिसिद्धं॥
गतास्थिमांसं सुस्विन्नं पुनर्दृषदि पेषयेत् व्योषादि संस्कृतं कृत्वा पचेद्दृष्टाहृतं युतं वेसवारोऽय
गुरु मुद्दिष्टं बल्यो वातहरो गुरुः इति वेसवारनाम गुणनामानि॥ स्विन्नमुद्गादिकल्कोऽपि वेसवारोऽप
रः स्मृतः हरिद्राव्योषसिंधूत्थहिंगुधान्यकदाडिमैः साजाजिभिर्वेसवारः सौरभ्येयमुदाहृ
तः सौरभनाम मुद्गादिवेसवारस्तु यथाद्रव्यगुणं वदेत् पिष्टमांससमुद्भूतः स्वच्छो मांसर
सोरसः सौरवः सौरवः सरसा हरसो लवणत्वनुः सौरवनाम संयुक्तो वेसवारेण रसः खनिष्ट

ति॰
मद॰
48

उच्यते खानिष्टानाम अथ मांसरसः रसो हृद्यः श्रमश्वासवातपित्तक्षयापहः प्रीणनो व्रणपु
क्षाणां क्षीणानामस्परेतसां विश्लिष्टभग्नसंधीनां शुद्धानां शुद्धिकांक्षिणां शस्यते स्वरहीनानां नेत्र
ष्टायुः श्रवणार्थिनां मांसरसगुणाः मदाडिमादिर्वल्लदो दोषघ्नः संस्कृतस्तु रसः इति दाडिमादि
रसमांसगुणाः सौरभः प्रीणनः शीतो मुखशोषश्रमापहः दीपनः क्लमवान्तघ्नः सर्वधातुविवर्ध वि
नः खानिष्टास्तु गरुः पथ्यो दीप्ताग्नीनां विशेषतः अम्लमामादिसंयुक्तो लवणोवु विपाचतः बल
कोवर्णकाम्येयारसा घालघवोमताः तक्रादिक्वाथसंभूता कथिताकथिनावुधैः कथिनापाचनी
हृद्या रुच्या वह्निप्रदा लघुः कफानिलविबंधघ्नी किंचित्पित्तप्रकोपनी मासककडीनामगुणाः
साकेतक्राद्भिः सम्यक्क्वाथितं कथितं मतं कथितं दीपनं रुच्यं वातश्लेष्मश्रमापहं भुक्त्या
स्वदेव शाकस्य गुणानेन तद्गुणं भवेत् कथिलीनामगुणाः पर्पटा लघवो रुच्या लघ्वी वा वार
पर्पटः पापरनामगुणाः पिण्याकस्तिलकिट्टः स्यात् मलले तिलपिष्टकः पिण्याको ग्लपनो
रूक्षो विष्टंभी दृष्टिदूषणः खरीतलिनामगुणा पललं वृंहणं स्निग्धं कफपित्तकरं गुरुः तल
टीनामगुणाः द्रव्यकालक्रियायोगदोषादीनि विचार्य तु अमीषामप्यनुक्तानामेषामपि गुणान्व
दे ॥ इति श्रीमदनपालविरचिते मदनविनोदे निघंटौ कृतान्नवर्गः एकादशः ॥ =
मुखेंदुपद्मप्रतिवोधलब्धविधुंतुदालिभ्रममादधानं लक्ष्मीकपोलप्रतिविंवमंगं गनीलोज्जनी

मद॰ नि॰

लंकलयामिनेज्ञा॰ अथमांसवर्गः हस्तीमतंगजोदंतीमातंगोनेवयःकरी सिंधुरःकुंजरापमीवा
रणोद्विरदोद्विपः इभोदंतःवलोनागःकुंभीस्तंभेरमोगजः हस्तिनीरेणुकाप्रोक्ताकरेणुःक
रिणीचसा गुणा हस्तीकफानिलोहन्यादुष्टःपित्तास्त्रकोपनः अथअश्वनाम घोटकःसैंध
वोवाजीतुरंगस्तुरगोहरिः तुरंगमोहयःसप्तिर्वीहोवीजीयज्ञजीवी घोटकावडवावामीस्त्का
श्वाचवाजिनी गुणा घोटकःकटुकापाकेदीपनःकफपित्तकृत् वातहृद्बृंहणोवल्यश्चलघु
श्चामधुरोलघुः घोटनाम ॥ततोसमसम्वतरःशीघ्रगोवेगपूजितः वल्यमाश्वतरंमांसंबृं
हणंकफपित्तलं वेसरिनाम उष्ट्रःक्रमेलकोवक्रग्रीवःशाखाशनोमयः द्विकण्ठकरभोदी
र्घजंगोध्यूसोमरुप्रियः गुणा उष्ट्रंमांसंलघुस्वादुचक्षुष्यमीनलापहं उत्समर्शः प्रशमनंमे
दःपित्तकफप्रदं अथगर्दभनामगुणाः गर्दभोरासभोभारवाहीदूरगमःखरः गुणा
गर्दभंपिशितंवल्यंबृंहणंकफपित्तकृत् कटुपाकेलघुश्रेष्ठंतस्माद्दूनांखरोद्भवं अथग
मासनामगुणाः शुष्ककासश्रमग्लानिविषमज्वरपीनसान् कोर्श्यकेवलवातांश्चगो।
मांसंसंनियच्छति अथमेसिमांगुणाः महिषःसैरभःप्रगीवाहवैरीचनाधनःकासामेग
वलोदंसोल्लुलायःकालवाहनः गुणा माहिषंमधुरंमांसंस्निग्धंपित्तवातनाशनं निद्रारेतो
वलान्सयतन्नुदाहीकरंगुरु तहदारण्यकंविद्याद्विशेषाच्छोषिणोहितं गेंडमासनामगुणाः

त

दर्वोच्छ भल्लो भल्लूकः खड्गी गण्डश्च गण्डकः ॥ गुणाः दद्रुः स्निग्धोगुरुर्वृष्योः स्वादुरसः पवनापहः
ऋक्षनाम गंडकोवद्धविट्मूत्रपवित्र पित्तनाशनः गेण्डे अथ शार्दूलमांसनाम ॥ सिंहः पं
चाननो हर्यक्षो मृगेंद्रः केसरी हरिः शार्दूलः स्यात्त्वचनखोवा मृगनाथः सटांकुजः गुणा सिंहशा
र्दूलयोर्मांसं मधुरं वातादिरोगजित् सिंहशार्दूलः व्याघ्रो मृगारिर्मृगहा व्यालो भीमपराक्रमः
व्याघ्रनाम चित्रकमांसगुणाः चित्रकोवेगवांश्चित्री द्वीपी तीव्रात्दंष्ट्रकः चीतो वृकमांस नाम
गुणा वृकद्रोहोमृगः कोकस्सरदत्तमृगादनः श्वानमांस ॥ कुक्कुरस्तुनखः श्वासः कौलेयः
श्वनकः श्वानः सारमेयः शुनस्श्वभषणो मृगदंशकः व्याघ्रनाम ॥ व्याघ्रश्चित्रसरक्षुश्च वृ
कानोपललंगुरु उष्णंवातपहं स्वयं हितमद्भिविकारिणां सूकरमांसनाम सूकरो रोमशः
पोत्रीकोलो वेणीगिरिः किटिः दंष्ट्री कोष्टः स्तब्धरोमा भूदारश्च वराहकः गुणाः सौकरं पि
शितं स्याद्दुबलं वातापहं गुरु स्निग्धोष्णं मुक्त्वले हृष्य निद्रा स्थूलत्वदार्ढ्यकृत् छागमांसनाम ॥
छागी गलस्तनी मज्जा सर्वभक्षा त्वजा प्युभा वाक्कर छागल छगोवस्तोजः कोलकः पशुः
छागमांस गुरु स्निग्धं लघुपाकं त्रिदोषजित् अदोदिर्वृद्धं नातिशीतं पीनसनाशनं देह
धातुसमत्वेदनाभिष्यंदि च हृदहरणं भेडामांसनाम मेषो भिडोमेढ्रकः स्यात् रक्तनारणीविकः
ऊर्णायुईडकोवृष्णिर्मेदपुच्छस्तहुमकः गुणाः मेषमांसं गुरु स्निग्धं वल्यं पिकफापहं ॥ मे

ष्ण मेद्रपुच्छमांस मेदः पुष्टाग्निं च वृष्यं कफपित्तकरं गुरु हरिणमांसनाम हरिः ताम्रवर्णः स्यात्कु
रंगः स्याद्धरुलोचनः सारंगोजिनयोनिश्च वातायुः चपलो मृगः एणः कृष्णोपरः कृष्णकुरंगः कृष्ण
सारकः गुणाः एणमांसं हिमं रुच्यं ग्राही दोषत्रयापहं बहुसंवलदं पथ्यं लघु हृद्यं ज्वरास्त्र
जित् शांवरमांसनाम गोकर्णो विकटः स्थूली विडंगधीः स्तन्य शंबरः गोकर्णः शांवरो स्निग्धो गु
रुः शीतो कफप्रदः रसे पाके च मधुरो रक्तपित्तविनाशनो रोझमांसनाम दक्षो नीलांडको नीलो
गवयः स्याद्रुदर्शनः गुणाः गवयो मधुरो वृष्यः स्निग्धोस्नः कफपित्तलः कस्तूरीमृगमांस
नाम कस्तूरीहरिणो गंधी मुंडनो मृगमातृका गुणाः कस्तूरीहरिणः स्वादुर्वह्निविवर्द्धनो
लघुः मुंडनी ज्वरकासार्शः श्वासहिक्काक्षयापहः डांकर चीतलमांस कृतमालो वर्गचरः
पृष्टतो विंदुचित्रकः वातप्रमीर्वातमृगः शीकरः कृष्णपुच्छकः कृतमालादिजं मांसं मधु
रं ग्राहि दीपनं हृद्यं शीतं लघुः श्वासज्वरदोषत्रयास्रजित् हरिणानां भेदः ॥ हरकस्वर न्युंक
ष्टंगोस्य कुन्बद्धविषाणकः हरोर्मांसं गुरु स्वादु वृष्यं पित्तानिलापहं न्यंकु स्वादुर्लघुर्वल्यः
स्निग्धो दोषत्रयापहः शशमांस गुणाः शशः स्थूलरोमकर्णो लंबकर्णो विलेशयः गुणाः
शशः शीतो लघुः स्वादुर्ग्राही पथ्योग्निदीपनः सन्निपातज्वरश्वासरक्तपित्तकफापहः शल्लीमां
सनाम मल्लकः शल्ली स्याद्विन्मेध्या सास्रचनी खगः गुणाः मल्लकः श्वासकासास्रशोफदो

पत्रयापहः मेधातथैवविसेषाँद्दलवर्धिनी विडालमांसनामगुणाः विडालस्तुमार्जारो वृषदंश
कस्तथाखुभुक् नकुलः पिंगलोवभ्रुः सर्पारिः सर्वभक्षकः गुणा मार्ज्जारोमधुरः स्निग्धोवीर्योस्लः क
फवातजित् हशतास्वासकासघ्नोनकुलोपिसमोगुणैः वानरनामगुणाः वानरोमर्कटःके
शपोवनौकास्सवलीमुखः हरिः शाखामृगः ज्ञावीप्लवंगकः प्लवगः कपिः वानरः पवनस्वासो
मेदः पांडुक्रिमीन्जयेत् इतिवानरगुणाः सृगालनाम सृगालोजंवुकः क्रोष्टागोमायुः फेरवः
शिवः शिवशोवंचकः फेरलोपकस्तथाजंवुकः गुणा सृगालोवलदोवृष्यः सर्ववातक्षया
पहः मूषकनामगुणाः मूषकः खनकः स्तेयी वृषभुग्वरुणायुक् गुणा मूषकोवद्वविट्सृत्रो
वल्योवृष्योनिलापहः नमोइतिचतुष्पदः अथविहगाः पक्षीविहंगमः पक्षीशकुनिर्विहगः
खगः गंडजेरिः पत्ररथः पतत्त्रीशकुनिर्द्विजः तित्तिरनाम।। तित्तिरिश्चित्रपदःसान्द्रलो
गौरः कपिंजरः गुणास्तित्तिरिवलदोग्राहीहिक्कादोषत्रयापहः स्वासकासहरः पथ्यः तस्मा
द्गौराधिकोगुणैः वटेरनाम वर्तीरोवर्तिकश्चित्रस्तोतस्यवर्तिकामता वर्तीरोग्निकरः शीतो
ज्वरदोषत्रयापहः लावमांसनाम लावश्चित्रः चित्रतनुः सचतुर्थीमतोवुधैः पांसुलोगैरिको
मस्तपौंड्रकोदर्भरस्तथा गुणाः लावाहृद्याहिमास्निग्धाग्राहीरोगेवह्निदीपनः पांसुलःश्ले
ष्मलस्तेषांवीर्यास्नोनिलनाशनः गौरीकःकफवातघ्नोरूक्षोवह्निप्रदःपरं पांडुकःपित्तकृत्कि

विलघुश्लेष्मपित्तलोपहः दर्भरो रक्तपित्तघ्नो दृग्यामयहरो हिमः गवाराः नाम चटकः कल
विंकः स्यादसौ ग्राम्यस्तु पुंड्रकः गुणा चटकः शीतलः स्निग्धः स्वादुः शुक्रकफप्रदः सन्नि
पातहरो वेश्मचटकः शुक्रलः परः वगरा नाम गरुडविडाः वाडीको मधुरः शीतो रूक्षः कफ
पित्तजित् पारावतो पाडुकप्रभृतयः पारावतः कलरवो मंजुघोषो मदोत्कटः कपोतो हंजु हेमां
गुरन्युः काम्यकपोतकः गुणा पारावतो गुरुः स्निग्धो रक्तपित्तानिलापहः संग्राही शुक्र
लः पाडुकपोतश्च विशेषो गुरुतरः किंचित् लघुपरं कण्णकपोतः सर्वदोषहृत् मयूरनाम मयू
रः चक्रकः केकी मेघानन्दी भुजंगभुक् शिखी शिखावलो बर्ही शिखंडी नीलकंठकः शुक्लापांगः कला
पी च मेघनादानुलास्यपि गुणा मयूरो बृंहणः श्रोत्रशिरोरुग्वातशोषजित् उत्सो बलायुर्मेधा
ग्निकेशादृक्स्वरवर्णदः सेव्यं मयूरजं मांसं हेमंते शिशिरे मधौ नशारः ग्रीष्मयोः पथ्यं वर्षास्व
प्यहिभक्षणात् कुक्कुटमांसनाम कुक्कुटो विष्किरः शौंडी कालज्ञस्वरणायुधः कृकवाकु
स्ताम्रचूडः स्यादसौ वनकुक्कुटः गुणा कुक्कुटो बृंहणः स्निग्धो वीर्योष्णो निलजिद्गुरुः चक्षुष्यः शु
क्रकफदो बल्यो कफरूक्षः कषायकः ग्रामेनकुक्कुटः स्निग्धो बृंहणः श्लेष्मणो गुरुः शुकशादि
नाम शुकोरक्ततुंडः कीरो वाग्मी स्फेदरदर्शनः शारिका रमिका दूतीसमतिः प्रियवादिनी॥
गुणाः शुकः शीतो लघुर्ग्राही दग्धकासक्षयापहः रूक्षातहृत्मतीशारी स्निग्धा बृंहिवला

ग्रिहृत् कोकलमांसनामगुणा कोकिलाकालकंठः स्यात्परपुष्टोवनप्रियः पिकः परभृतोहारी
ताम्राक्षोमधुहृतकः गुणा कोकिलोदीपनोग्राहीचक्षुष्यः क्षयकासजित् काकमांसनामः
काकोध्वांक्षोगृहध्वांक्षीमौवलिपुष्टः सकृत्प्रजः वायसोवलिभुक्कारवः करटस्त्रुवरोगहिन्नाः गृ
ध्रमांसनाम भासः शिवावात्भासंतोगृध्राकारोरजः प्रभुः गुणाः काकभासभवंमांसंच
क्षुष्यंदीपनंलघुः आयुष्यंवृंहणंवलंदानदोषत्रयापहं मद्गुमांस गुणाः गृद्धः सदृष्टिरा
कुवीचकदंडश्वेत्दृरदृक् गुणा गृद्धस्यकाकवन्मांसंविशेषान्नेत्ररोगजित् हंसमांसनाम॥
हंसः श्वेतगरुन्मानंरक्तोनेत्रपदाननः राजहंसः स्मृतैवृंसैर्धार्तराष्ट्रोयमल्लिकः मलिनः
कालहंसस्तुपीतः कादंवउच्यते कारंडवः सवोसद्गुर्वरजाहंसयोषिता गुणा हंसः स्निग्धो
गुरुर्वृष्यावीर्योष्णः स्वरवर्णकृत् वातास्रपित्तशमनोवृंहणोवलवह्निदः चक्रवामांसनाम
सारसोलक्ष्मणोगरक्तमन्दर्थास्यात्पुष्कराह्वयः चक्रवाकः पत्ररथः चक्रचक्रीसकामकः रथा
गनामाकोकोथककः स्यात्लोहपृष्ठकः चक्रवाकाचकोरकावलाकाविसकंठका वकमांस
नाम वकोवकोटोधवलोवलाकाविसकंठिका अथ सिंहनाम आटिमराटिराटिम्बविचि
त्राजलचारिणी गुणा चक्रकंकवकोराटिमासंस्निग्धंहिमंगुरुः मधुरंविष्टंविट्मूत्रवातना
पित्तास्रनाशनं केटनाम करटकः कर्करेटुः क्रकरः क्रकणस्तथा वृष्यंवृंहणोवलो

वातपित्तहरोलघुः इतिककरः अथखंजरीटमांसनाम खंजरीटः खंजनकः वाषनामाकिकी
दिविः वर्तिहानाम चतुकः तच्चनारावः सारंगस्तोककोभ्रमः भारद्वाजःनाम भारद्वाजः
ककरटोव्याघ्राटोहिः कुटिःपरः गुणाः खंजरीटश्चातकश्चचाल्लेष्मानिलापहः वातकोनि
लपित्तघ्नोभारद्वजःकफास्रजित इतिखंजरीनांगुणाः अथश्येनगुणाः श्येनःशशादनः
पत्रीविरंचिलिम्विरैलिकः श्येनाचीरीभवंमासंप्रायोदोषकरंगुरु उलूकनाम उलूकःकौशि
कः काकवैरीव्रकनिशाचरः गुणाः उलूकपललंभ्रांतिप्रदंवातप्रकोपनं चकरनाम च
कोरचंद्रकापायीजीवंजीवः सुलोचनः गुणा चकोरोवृंहणोवल्यः स्निग्धोसौवातनाशनः
पेगनाम कुक्रौचःषीचकोन्यश्चपुच्छाधोभागलोहितः तक्रौचः कुकुरोयान्यःकोपष्टिः
ष्टिटिभस्तथा गुणा क्रौंचः पित्तानिलहरःपेचकः कफवातजित कुररः कंचनुस्रेयटी
टिभोल्पमहत्करः क्रौंचकुविरपेचाटीटिभादि अथमत्स्यमांसनामगुणाः मत्स्याभष
स्तिमिन्मीनः कंठवैसारणोटुजः पृथुरोमाभिसारः साहिमारःशकुलीतथा रक्तोदरो
रक्तमुखोरोहितोमत्स्यपुंगवः सहस्रदंष्ट्रःपाठीनः कृष्णवर्णोमहाशिरः शफरःक्षुद्र
मत्स्यः स्याप्रोष्टीतुशफरीमता वलमीनः चिलिचिमस्तिमिस्तिः ख्यातःसमद्रगः गुणाः म
त्स्यावलप्रदावृष्यागुरवः कफपित्तलाः उष्णाभिष्यंदिनःस्निग्धावृंहणाःपवनापहाःरो

ह्रमत्स्यानाम॥ नादेया बृंहणा मत्स्या गुरवोनिलनाशनाः कौप्या वृष्याः कफश्लीलामूत्रकुष्ट
विवंधदाः तडागा गुरवो वृष्याः शीतदा बलमूत्रदाः तडागजा निर्झरजा वलायुर्मेतिद्धकराः
सरोजा मधुराः स्निग्धा वल्या वातनिवर्हणाः सामुद्रा गुरवो नाति पित्तलाः पवनापहाः नेत्रा
पिलवणा भोज्या ग्राहिणो दृष्टिनाशनाः ह्रदोद्भवा वहुकराः लमम्भुजलोद्भवाः हेमंते कूप
जा मत्स्याः शिशिरे मारसा हिताः मधु ग्रीष्मावुका केसुनदी-- एडी तडागनाः शरत्सु स
नैर्जरा सर्वे वर्षा त्या सर्वदोषद[illegible]निवर्हणाः प्रवरा स्तेषु नाति पित्तकरो लघुः मत्स्याणाना
म तद्भ मत्स्याः स्वादुरसा दोषत्रयनिवर्हणाः रुत्स्याः परं पुस्त्वकराः रुच्याः कासानिलापहाः
त्रिदोषहृच्चिलिचिसत्ति मिर्वलः परं मतं मत्स्या गर्भः परं वृष्यः स्निग्धस्थौल्यकरो गुरुः
कफमेदः प्रदो वल्यो ग्लानिकृन्मेहनाशनः शिशिमारो मकरनाम॥ शिशुमारो हृते स्मृ।
लोमकरस्तु मिदंष्ट्रकः गुणाः शिशुमारो गुरुर्वृष्यः कफवातनाशनः वृंहणो वलदः
स्निग्धः तद्वन्मकरमादिशेत् कछुवानाम कच्छपो ग्राहपान्कूर्मः कामठो दृढपृष्ठकः
कच्छपो वलदः स्निग्धो वातजित् पुंस्त्वकारकः सेजकमएडूकनाम मंडूकः प्लवगो भेको
वर्षाभूर्दर्दुरो हरिः मंडूकः श्लेष्मलो नातिपित्तलो वलकारकः कोकशानाम॥ कर्कटः कर
वेलः स्यात्कुलीरः षोडशांघ्रिकः गुणाः कर्कटो वृंहणो वृष्यः शीतलोऽस्त्रदरापहः स

र्पनाम सर्पो भुजंगो भुजगः फणी भोगी भुजंगमः कुंडली कंचुकी चक्री पन्नगः पवनाशनः र
दपादुरगो नागो जिह्मगः श्वसरीसृपः चक्षुःश्रवा दीर्घपृष्ठो व्यालस्याशीविषस्तथा दर्वीकरो विष
धरो दंदशूको बिलेशयः कुंभीनसमदाकुक्ष्वदंष्ट्रीकाकोदरी विषी ठिंडुभो राजिलः प्रोक्तो जग
रो वायुभक्षः शिशुः जलसर्पो लगंधः स्यात् निम्नगोत्तमः स्मृतः गुणाः सर्पाणां त्वेहजं मांसं च
क्षुष्यं बृंहणं गुरु दृष्यं विषं क्रिमिहरं मेधाग्निबलवर्धनं गोधानाम गोधा घोरकरा पंचन
खा रजनिचारला तथा कृकलासः पंचाणगो यौ गोधीरः समहाविषः गोधाग्निजननी वृष्या रुच्या पि
त्तानिलापहा अथ सद्योहतं मांसनाम ॥ गुणाः ॥ सद्योहतं भक्षेन्मांसं व्याधिवारि विषापहं तं व
यःस्थमेकशः सात्म्यमनग्यापरिवर्जयेत् वृद्धवालमांसनाम गुणाः वृद्धानां दोषलं मांसं वाला
नां बलदं गुरु घृतगर्भा गर्भमांसनाम गुणाः घृतगर्भा गुरु र्यो विद्भगर्भमंदनी तथा स्वयं
मृतमांसनाम गुणाः स्वयं मृतमबलं स्यात् दनीसारकरं गुरु अ— षमांसनाम गुणाः विषौ
षधैर्हतं मत्स्यदोषत्रयहरज्जावहं विहंगेषु पुमान् श्रेष्ठः स्त्री चतुष्पदजातिषु पश्चार्धं लघु
पुमांस्यात् स्त्रीणां पूर्वार्धमादिशेत् तलजाति स्थलदेहो महादेहेषु पूजितः अल्पदेहेषु
गास्यं ते तद्धि वस्थलदेहिनः चेष्टावतां परमांसं मलमेध्यो लघु स्मृतं देहमध्ये गुरुप्रायः स
र्वेषां प्राणिनां मतं पद्मो ह्यधः पादि दिग्भागानां तदेव समवस्थानते गुरुत्वं पंडानि सर्वेषां गलग्रीवं च

धो:

नि॰
५३
53

पक्षिणां येमृगाविष्किराल्लोपहूराकासप्रवारकाः तेनाभिष्यंदिनः सर्वेविपरीतास्मतोन्यथा जा
लाद्भवाः सर्वेजलानूपभवाः सर्वेजलानूपचराश्चये गुरुभक्ष्यास्तु गुरुतरास्तेषांमांसमुदीरि
तो यन्मोत्तमैः प्रचाराणांलघुस्याल्लघुभक्षिणां गुरुस्कंदोदरंमूर्धापादौपाणिकटेतथा पृ
ष्ठत्वायकृदत्ताणि गुरूणांद्विपयोत्तरं ॥ इतिश्रीमदनपालविरचितेमदनविनोदेनिघंटौमां
सवर्गोद्वादशः ॥१२ गोपालबालैः सहमल्लविद्याविनोदद्वंदुतकाकपदंउपास्महेवाङ्म
नसातिदूरंमहः परंनीलमचिंत्यलीलं धान्येषुमांसेषुफलेषुचैवशाकेषुचानुक्रममिहप्रमा
दात् आस्वादनोभूतगुणैर्गरिष्ठान्वातद्दिशेद्रव्यमनल्पबुद्धिः षष्टिकायववगोधूमालोहिताये
चशालयः मुद्गाढकीमसूराश्च धान्येषुप्रवराः स्मृताः एणाः कुरंगोहरिणाः तित्तिरिर्लावएव
च मयूरवर्हिकूर्माश्च मेषमांसगुणैः स्मृताः फलेदाडिमामलकेद्राक्षाखर्जूरंसपरूषकं ॥
राजादनंमातुलिंगंफलवर्गेप्रशस्यते शाकं चंचुः सतीनावास्तूकःचिल्लीमूलकपोतिकामं
डुकपर्णीजीवंतीशाकवर्गः प्रशस्यते गव्यंक्षीरंघृतंशीतंश्रेष्ठंसैंधवंलवणेषु धात्रीदाडिम
मम्लेषुपिप्पलीनागरंकटौ तिक्तेपटोलवार्ताकंमधुरेघृतमुच्यते शौद्रंपूगफलंप्रोक्तंकषा
येसपरूषकं शार्करस्त्वविकारेषुपानजातेषुरासवो परिसंवत्सरंधान्यंमांसंवयस्थमध्यमे
फलंपर्यागतंशाकमसुष्कंतरुणंनवं वातेनपानेस्निग्धोष्णंसद्योलघुश्लेष्मणः स्मृतं पित्ते

स्निग्धहिमं स्नेहपाने तोयमशीतलं भल्लातके स्नेहमूर्छाव्याघ्नानां शीतलं जलं शालिमुद्ग
दिघृताणां रूक्षो मांसरसो यवा माषादिभोजिनां मद्यं धान्याम्लं दधिवा स्मृतं ॥ तन्निद्राणां
विषार्तानां मल्लाग्नीनां च शस्यते उपवासाध्वभारस्त्रीमारुतातपकर्मभिः पयः सुधासमं प्रो
क्तं क्षीणानां रक्तपित्तिनां अत्यल्पं स्वेदोषलेशो नमतिमात्रमयो गुरुः उष्णान्नपानतो भुक्तं स
म्यमन्नं प्रजीर्यते तदा दौर्बल्ययो शीतं स्यायपयेन्मधुसेवितं पश्चात्पीतं देहयति तत्समीदृप्रयो
जयेत् न पिवेत् भ्रमुक्तकासोर्ध्वजंतरोगत्ततान्तरः पीनाभिभाव्याध्यायननिद्रानस्वरयोर्भजे
त् नककफानिलपित्तेषु चैकहित्रियलोम्मितं वारिनास्यमुषः काले हंषिकारिरसायणं व
लीपलितवैस्वर्यपीनसश्वासशोथजित् पानीयप्रस्तैरष्टोयः पिवेदरुणोदये सज्जरोव्या
धिनिर्मुक्तो जीवेद्वर्षशतं सुखी भुक्तोपविशतस्तुष्टो वलमुत्तानशायिनः अयुर्वामकटि
स्य सस्य मृत्युर्धावतिधावतः रात्रौ जागरणं रूक्षं स्निग्धे प्रस्वापनं दिवा निद्राकाले कृतानादृष्टि
र्वैलोम्लाहातिसप्रदा धातुसाम्यावहाक्षीणस्त्रातामांशस्यते सदा निद्रास्वप्नीकृतायैस्तु
रात्रौ क्षयदिवा दिवा नतेषास्वयतो दोषो जाग्रतो चोपजायते भोजनानंतरं निद्रावातश्लेष्मक
फपुष्टिकृत कफमेदोविषार्तानां रात्रौ जागरणं हितं दिवास्वप्नंचु त्वट्शूलहिक्काजीर्णाति
सारिणां दंतधावनमुद्दिष्टं सौगंध्यमास्यकारकं प्रसेकारुचिदौर्गंध्यमलपित्तकफापहं ॥

५४
54

मदातुरः क्लमः श्रांतोदंतमालोष्टरोगवान् हिक्काच्छर्दिशिरःपीनासमूर्छाशोषीनवज्वरी मुख
प्रक्षालनेशीतंपयसारक्तपित्तजित् मुखस्यपिटकाशोषनीलिकाव्यंगनाशनं पादप्रक्षा
लनेदृष्टिकरंवृष्यंश्रमापहं पादाभ्यंगः परंवृष्योवलोत्साहविवर्धनः निद्रासुखकरः
सुप्तिश्रमनेत्ररुजापहं स्नेहगंडूषकरणंमुखशोषहृदामयात् स्वरघातोष्टपारुष्यरक्ते
वातान्विनाशयेत् सुखोष्णोदकगंडूषः कफारुचिमलापहः विषमूर्छामदार्तानां शोषरोगार
क्तपित्तिनां कुपितानांक्षिमलक्षीणरूक्षाणांनप्रशस्यते अंजनंनेत्रनेर्मल्यंदृष्टिकारिरुजापहं
रात्रिजागरतः श्रांतः छर्दितोभक्तवांस्तथा ज्वरातुरः शिरःस्नातः कदाचिन्नतदाचरेत्
व्यायामः कर्मसामर्थ्यस्थैर्यदोषक्षयाग्निकृत् समदागुरुणमाधत्तेवलिनांस्निग्धभोजि
नां व्यायामेरुहंगात्रस्थव्याधिनोलिकदाचन विरुद्धंवाविदग्धंवाभुक्तंशीघ्रंविपच्यते॥
भवंतिशीघ्रंनैतस्यवलीशिथिलतज्वराः वसंतेशीतसमयेस्वज्वरोस्वमतोदितः अन्यद
पिसकर्तव्यःशस्तार्धेनवलावलं ततंसमीक्ष्यास्वेदकंग्रीवाललाटयो ईक्षवान्नह
तसंयोगः कासीश्वासीक्षयी दृशः रक्तपित्तीक्षतीशोषीनतंकुर्यात्क्षुद्वादितः अतिव्यायाम
मतः कासोज्वरश्छर्दिश्चजायते मर्दनंश्रमवातघ्नंनिद्रापुष्टिवलप्रदं केसशमश्रुन
खोनांचकर्तनंश्रचिरूपकृत् केसप्रसधनीकेश्यारजोजत्रमलापहा अभ्यंगोवात

रोगघ्नो धातुसाम्यं बलं त्वक्त्वं निद्रावर्णं मृदुत्वानि कुरुते दृष्टिपुष्टिकृत् शिरोभ्यंगः शिरःतृ।
प्तिः केशपाताद्विपुष्टिदः उष्णैवः श्रवणे बाधिर्यमलं हन्याद्धनुग्रहात् कदापिकर्णरो
गात्र कुरुते कर्णपूरणं सिक्तस्याङ्घ्रियेथा मूले तरूणां पल्लवादयः वर्धन्ते हि तथा नृणां
स्नेहसिक्तस्य धातवः स्नेहावगाहने वातशमनं धातुपुष्टिदं मात्राभिस्त्रिचतुष्पंचषट्
सप्ताष्टभिर्व्रजेत् रसासृग्मांसमेदोस्थिमज्जाधातून्यथाक्रमं वातेभ्यंजुराजीर्णि
विरिक्ते केवलामयान् निरूहलर्घनीयुश्च स्नेहाभ्यंगादि वर्जयेत् उद्वर्तनं वातहरं
भ्राजकानलदीपनं स्नानं वातभ्रमालक्ष्मीयामाकंडूमलापहं हृद्यं कामहरं वह्निसंवे
द्वियविवर्धनं नतंदुलेन शिरसो धौज्यं नेत्रहितेयतः कफवातप्रकोपेन भेषजार्थं तदा
चरेत् तन्मातिसारज्वरितकर्णशूलानिलार्तिषु आध्मानारोचकाजीर्णभुक्तवत्सु
चनहितं अनुलोमहृत्वषान्कष्ठीदौर्गन्ध्यश्रमदाहजित् सौभाग्यतेजस्त्वग्वर्णप्रीत्सा
युर्बलवर्धनः कुंकुमावरताद्विधारणं कांतिकारणं पापरक्षाग्रहहरं कामोजः प्री
तिवर्धनं उपानद्धारणं नेत्रमायुष्यं पादरोगजित् पनहीगुणाः उष्णोशांत्युचिदं केश्य
रजोवातातपापहा पगाउपा छत्रधारणमोजस्यं चक्षुष्यं हिमघर्मजित् छत्रगुणाः॥
बालव्यजनमोजस्यं मक्षिकादिनिवारणं व्यजनस्यानिलः शोषमूर्छास्वेदभ्रमापहः वे

णाः यष्टिधारणमुत्साहः स्थैर्यं चावष्टंभवीर्यकृत् यष्टिधारणगुणाः तालवृन्तमयं वातत्रि
दोषशमनं विदुः तालवृन्तगुणाः मौक्तं वेणुमयं वातं वातपित्तप्रकोपनं वेणुवातगुणाः
चामरं वस्त्रवातौ च समावुभौ वेत्रजस्तथा एते दोषजिता वाताः स्निग्धा हृद्याः सुपूजिताः आ
युर्वृद्धे तेगुडे रोगान्मन्दस्तु नौलोविदाहिषु आरोग्यकटुतिक्तेषु बलं मांसचयश्च सः स च आस्यस्योल्ल
रुचिः श्लेष्मासेकुमार्यं सुखप्रदं चंक्रमणं यानि देहपीडाकरं भवेत् तदायुर्बलमेधा
ग्निप्रदमिंद्रियबोधनं सदस्त्वक्पायागुणाः सुवेशश्यासनं नित्यं पुष्टेंद्रियबलप्रदं आतप
स्वेदमूर्छास्वतृष्णादाहक्लमभ्रमान् कुरुते पित्तवैवर्ण्यं छायामेतच्चापोहति अग्निशीतानि
लस्तंभः कफवेपथुनाशनः रक्तपित्तप्रदूषी स्यादामाभिष्यंदपाचनः समः पित्तानिलौ कु
र्याद्वर्षापायः कफानिलौ ज्योत्स्ना शीता सरानंदप्रदा तृड्दाहपित्तजित् तमो भयावहं मोह
कफपित्तक्लमप्रदं दृष्टिर्दृष्ट्या हिमानिद्राभिष्यंदालस्यकारिणी प्रवाते रौक्ष्यवैवर्ण्यस्तं
भकृद्दाहपित्तनुत् स्वेदमूर्छापिपासाघ्नमप्रवातमनोऽन्यथा मुख्यप्रवातं सेवेत ग्रीष्मे शर
दि वातरा ह्विवातमायुष्यं सेव्यमारोग्यपथ्यं च सर्वदा सद्योमांसं नवं चान्नं बालास्त्री क्षीरभोजनं
घृतं सुखोष्णोदकैः स्नानं सद्यः प्राणकराणि षट् पूतिमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि प्र
भाते मैथुनं निद्रा सद्यः प्राणहराणि षट् अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः पय
णा

सोष्णगुणं मांसं मांसाद् उष्णगुणं घृतं घृताद् उष्णगुणं तैलं अभ्यंगेन तु भोजने लेपनं कफमेदो
घ्नं मरुत्प्रवालहरं लघुः पाचनं दीपनं वातकरं ग्लानिश्रमजित् तत्रयुक्तेनरेवालेगर्भिणीस्य
प विरेकृरो शोककम्पभयक्रोधमार्गश्रमचिरज्वरे पूर्वानिलो गुरुः स्वादुः स्निग्धः पित्तास्रवर्धनः रो
गकृद्दिष्टव्रणानां दत्तव्रणवलासिनां विदाही वातलः श्रान्तकफशोषवतां हितः दक्षिणः पवनः
स्वादुरक्तपित्तहरो लघुः अविदाहप्रदो बल्यः चक्षुष्यो न च वातलः पश्चिमः पवनो रूक्षः तीक्ष्णो
लेदबलापहः विषदः शोषणो नृणां कफमेदोहरो लघुः उत्तरो मारुतः शीतः स्निग्धो दोषप्र
कोपजित् क्लेदनः प्रकृतिस्थानां बलदो मधुरो मृदुः क्षयक्षीणविषार्तानां विशेषाद्गुणकारकः इ
तिवायुगुणाः ॥ रसो मधुरकः शीतो धातुस्तन्यबलप्रदः चक्षुष्यो वातपित्तघ्नः कुर्यात्
स्थौल्यकफक्रिमीन् सोऽतियुक्तो ज्वरश्वासगलगण्डार्बुदादिकृत् रसोऽम्लः पावनो रुच्यः पि
त्तश्लेष्मकरो लघुः लेखनोष्णो वह्निः शीतः क्लेदनः पचनापहः सोऽतियुक्तः परेदाहरक्तपित्तादि
रोगकृत् ॥ लवणः शोधनो रुच्यः पाचनः कफपित्तदः पुंस्त्ववातहरः कायशैथिल्यमृदुता
करः सोऽतियुक्तो द्वियाकास्रपित्तकोष्णतादिकृत् कटुकः पित्तलः श्लेष्मक्रिमिकण्डुविषा
पहः आग्नेयो वातलस्तन्यमेदःस्थौल्यहरो लघुः सोऽतियुक्तः शिरःशूलमन्यास्तम्भवलादि
कृत् तिक्तः शीतस्तृषामूर्च्छाज्वरपित्तकफाञ्जयेत् वातलोऽग्निकरस्तन्यशोधनः शोषणो

नि॰
५६
56

लेह्यः सोतियुक्तोभ्रममास्यशोषतालशोषानिद्रादृटः कषायोरोपणोग्राहीशोधनोवातकोपनः
कफशोणितपित्तघ्नोरूक्षः स्वादुतोगुरुस्तथा सोतियुक्तोग्रहाध्मानहृत्पीडावातयकासकृत्॥
इतिषट्रसगुणाः प्रसन्नदृष्टिर्दृढदंतकेशयः शशांकवक्त्रः पलितैर्विहीनः पिकाभकंठः
कमलाविग्रयोनसेवापसेवीभवतीहमर्त्यः कासोपलेपस्वरभेदनिद्रातंद्रास्यदौर्गंध्यविषो
पसर्गाः कफप्रसेकग्राहणीप्रदोषाभवंतिजंतोर्वसितोहिनूनं वृद्धेप्रसादंबलमिंद्रियाणामायु
तः स्थिरत्वंबलमग्निदीप्तिं चिरप्रपाकंवयसः करोतिविरोचनंमस्तुपास्यमानं वस्तिवा
तंचपित्तेवकफेरक्तेचशस्यते संसर्गसन्निपातेचस्निरेचसदाहितः स्नेहेनसिक्तोहियथाद्रु
मः सान्द्रोलक्टः कोमलपल्लवाढ्यः कालेमहापुष्पफलप्रदःस्यात्तथानरः स्यादनुवा
सनेन नवदोषः ग्रेष्मयः शोफारोगाशोणितसंभवाः रक्तमोक्षणशीलानांनभवंतिकदा
चन संघर्षाकुष्ठपिटिकाभवंतिहिमलावर्षास्तुवातादयः स्निग्धस्याहयुगेनलेढुपातरेवे
हेनदेयंततः स्वन्नंदीपनपाचनंमलवरकेदापहोस्नेद्रवं रूक्षंनातिकषायतिक्तकटुक
स्निग्धंचकिंचिद्रसं दिव्यंचोष्णमथाचतत्तुशिशिरसद्वोद्भमल्पंपिबेत् संदेसोष्णयोविदाहमपि
केनाहृएयोगान्नदा व्यायामार्कमरीचिमैथुनमारुतावश्यायवर्ज्जीततो भुक्त्वाथवाभुंज
गदंशमपाकैर्वजीर्णयेनालये शीतैरुष्णनवातवृष्टिजनितैः संगारनायेरदेह निर्वातेदि

५६

तिपुरावीनमथ्वरंकिंचिच्चपीत्वा सर्वं काश्मीरागुरुलेपभूषितनवर्वालांगनाभिर्व्रजेत् जग्धान्नंव्य
जनावमारुहनरतिस्वापेद्दिवाचत्यजेत सेव्यः स्वादुकषायतिक्तविवदावर्षास्वपेजांगलः ॥
द्राक्षाशर्करितेक्षुशालिमधुगोधूमसमुद्गादयः नैर्मल्यादविलंजलंलघुतरंवासः स्वजाश्च
दनं सेवेतेंदुकरांश्चदोषसमयेगाढेनसाःज्ञनरः वर्षासूपचितंविरेकविधिनापित्तंहरेद्बु
द्धिमान् शुक्लारक्तविमोक्षणेनहविषः तिक्तस्यपानैस्तथा रात्रौजागरणंव्यवायमधि
कंघर्मंतुषारंदधि क्षाराम्लोत्कविदाहितीक्ष्णकटकंनिद्रांदिवांचत्यजेत हेमंतेलवणाम्लति
क्तकटुकक्षारोष्णकटुकंरुक्षणं सर्पिस्तैलसमेतमांसरसमन्नंतीक्ष्णशीधुपानानिच सेवेतागु
रुभूषितोवृषिशिशिरेगाढेनतैलप्लुतः कौशेयास्तरणेशयानशयनेसंगाररंतापेगृहे स्या
मापीनपयोधरोरुजघनामालिंगयन्योगवांवाह्लीकागुरुलेपभूषिततनुर्धूपैर्वरैर्धूपि
तः कामंमैथुनमत्रतर्पितवपुः सेवेतवल्येरसैः कर्तव्यः शिशिरेयमेवनितरांशीताप
कर्तीविधि तीक्ष्णक्षारकषायतिक्तकटुकंकोलंवसेतशानं स्वन्मधुमधुमद्यजांगलयव
प्रायोहितंवाद्रवं व्यायामंविपिनेचकोकिलकुलालापाकुलेकामिनी स्नातोद्वर्तनंचंद
नानिन्द्यपरिः सेवेतरम्याःस्रजः हेमंतेनिचितः प्रकुप्यतिकफश्चित्तोकरैरीरितः नरा
जलगुणाः धारेभूमावपतितंदिव्यंतत्सर्वदोषघ्नम् धारंगुरुहिमंरूक्षंविषदंकफवात

५८

५८

57

तज्ज्ञैः हैमंजलगुणाः हैमंगुरुतरंशीतंपित्तनुद्वातवर्धनं चंद्रकांतजलगुणाः चंद्रकांतजलं
रुच्यंलघुपित्तविषास्रनुत् हंसोदकजलगुणाः दिवारविकिरैर्जुष्टंनिशिशीतकरांशुभिः जु
ष्टंहंसोदकंनाम्नास्निग्धंदोषत्रयापहं अनभिष्यंदिनिर्दोषमंतरिक्षजलोपमं बल्यंरसायनंमेध्यं
शीतंलघुसुधासमं वर्षाकालेहितं वर्षासुदिव्यंपानीयमौद्भिदंवाप्रशस्यते शरदीति शर
दिप्रसन्नंमृदुयादृगल्पसत्वाविलंहिमे हेमंतेरिति हेमंतेसारसंतोयंतडागंवाप्रशस्यते वसंतेरि
ते तथाग्रीष्मे वसंतेग्रीष्मयोः कौपंवाप्यंनैर्झरमेवच वर्षाकाले प्रावृषिप्रवरंचौंडामन्त्र
ष्यमस्याविलेः शीघ्रप्रवाहनदीगुणाः नद्यःशीघ्रवहालघ्व्यःप्रोक्तायाश्चामलोदकाः मंद
गाः नदीगुणाः मंदगाः कलुषागुर्व्यःयश्चशैवलसेविताः उत्तरोनद्याःगुणाः हिमवत्प्रभ
वाःपथ्यानद्योयाश्चाहृतपापसः गंगाद्यायंचनद्याःगुणाः गंगाशतद्रुसरयूयमुनाद्यागुणो
त्तमाः ईषत्पित्तकराःस्वच्छाःपुण्यवातकफापहाः दक्षिणगाःनद्याःगुणाः मलयाचलजा
नद्योलघुशीघ्रवहाहिताः कृतमालाताम्रपर्णीप्रमुखाविमलोदकाः स्थिरास्वादुतराएव॥
कुर्वंतिश्लीपदंपदी शोथपादशिरःकंठगलरोगार्बुदक्रिमीन् मद्यागुणाः॥ मद्यंसल
भवानद्योवीणगो तस्मात्त्याज्यंशिरोविरेकवमनैर्गंडूषधूमादिभिः सप्राज्ञाम्बुजयीतविश्व
जलदक्कायैरयोलाबुभिः शीतस्निग्धगुरुद्रवाम्लमधुरनिद्रांदिवांचनजेत ग्रीष्मेशी

५७

ताग्टहान्सरांसिसरितोवापीवनानिस्रजो हारान्शीतलतालवृंतपवनान्सेवेतनि
दाघेदिवा वासःस्वच्छलघुमनुस्समयफरं चात्रसमसर्पिर्दिवे मेध्यक्षीरकपानका
नित्रसितादिरथानिशीतान्यपि फत्रेष्टसंतलेशायीनशयनैः प्रतपसुपुष्पार्चितः॥
वातेष्मंदनचेद्दुचर्चिततनुस्संस्पर्शमानमृदुः व्यायाममैथुनशोषिमेथुनरति
मुद्यंतयोस्तूरसान् नाश्नीयात्सतितंस्त्यजेन्मतिमतोवैद्यस्सदाकोरतः योराज्ञो
मुखतिलकः कदारमल्लः योराज्ञांभवतिलकः कटारमल्लस्तस्त्रीमदनन्दपेण
निर्मितेत्रग्रंथेमदनविनोदनाम्नीपूर्णोवर्गायंललितगुणोस्त्रमिश्रकोन्यः

इति ॥ श्रीमदनपालविरचितेमदनविनोदनाम्निनिघंटौत्रयोदशोवर्गःसम
प्तम्॥ संवत् १९११ माहज्येष्ठशुक्लपक्षअष्टमीशनिदिने लिषतेहरनारायण
॥ ॥ सालिगरामजीदासभक्त पठनेरामजीदासभक्तशुभं ॥ ॥

॥ ॥

58

रसमंजरी [illegible] का वीर [illegible] रा पास
ओवलपा नंद के पत्र २
का [illegible] [illegible] [illegible]

~~[illegible]~~ ज पड़े लकु है ।। ५
।। उत्तम पनी [illegible] पड़े लकु है ।। २ ।। [illegible]
।। [illegible] तीज पड़े लकु है ।। ३ ।। [illegible]
।। [illegible] १
।। रसमंजरी की टीका के जपड़े लकु है ।। ५ ।।

॥ ओम् ॥

॥ पुस्तकनिर्द्धट ॥

॥ रायहिरदेरामदा ॥

॥ शुभं ॥

मजमीलाफंजरदोजके बो। वनहीरचठाय



ਨਿਘੰਟ



